अथ

४४
2(B)

अनुमानचिन्तामणौ हेत्वाभासनिरूपणम् ।

मथुरानाथ([illegible])प्रणीतम्

Anumanchintamani Hetwabhas Nirupanam.

707

स्येत्यर्थः यथाश्रुते कार्यकारणभावविरोधादीनामनादित्वसंदुर्वचत्वात् आदिना व्याप्तिपरिग्रहः तन्नेति कार्यकारणभावादीनां अनादित्व
सिद्धेर्विषयत्वे इत्यर्थः अनुमानस्यैवेति प्रत्यक्षस्य तत्रासंभवादित्यर्थः तथा च तत्राप्यनुमानमेवेति भावः अनुमानतो व्याप्तिनिश्चयाधीन
प्रवृत्तिकत्वात् तत्रापि तर्कापेक्षायां अनवस्थैवेति भावः तदेवं व्यभिचारादर्शनसहकृतसहचारदर्शनं व्याप्तिग्राहकं तर्कः शंकानुत्पत्तौ
प्रयोजक इति अनवस्थाप्यतर्कादिनोपाधिकत्वग्रहः तदुभयाभ्यां मिलिताभ्यां व्याप्तिग्रह इत्येकदेशिमतमाशंक्य दूषयति अन्येत्विति तदधीन इति त
योरधीन इत्यर्थः अनौपाधिकत्वग्रहे व्याप्तिग्रहे च तर्कः स्वतंत्रो हेतुः प्रमाणसहकारी वा नाद्य इत्याह तर्कस्येति तथा च प्रमाणस्यैव स्वतंत्रजनकत्व
नियमेन तर्कप्रमाणत्वाभावाज्जनकताभाव इत्यर्थः द्वितीयं शंकते व्यभिचारादिति आदिपदादुपाधिपरिग्रहः आघातात् तर्काभावातिरिक्तकारणांत
राभावात् विरहः अनुत्पादः इति तत्र व्याप्तिग्रहे अनौपाधिकत्वग्रहे च केचित्तु अनौपाधिकत्वज्ञानं व्याप्तिधीजनकं तन्मतमाशंक्य निराकरोति अनौपाधि
तिसाधनादिति अनुमानादित्यर्थः अनौपाधिकत्वं सुग्रहमिति तथा च तर्कहेतुकमेवानौपाधिकत्वज्ञानं व्याप्तिधीहेतुरिति भावः अनवस्थानादि
ति तदनुमानमूलस्य व्याप्तिज्ञानेऽप्यनौपाधिकत्वनिश्चयस्य हेतुत्वादिति भावः व्याप्तिग्रहे यावत्परव्यापिनः कुत्रचित्तर्कोऽपेक्षते इति मीमांसकैक
देशिमतं निराचष्टे व्येवेति व्यभिचारसंशयस्य तत्सामग्र्याश्च प्रतिबंधकत्वादिति भावः अनुकूलेति व्यभिचारशंकानुत्पादानुकूलेत्यर्थः सहचारादिसा

८

मू.म.

दिनासंबंधिनः साध्यादेः परिग्रहः व्याप्तिग्रहं सर्वत्र व्याप्तिनिर्णयं साध्यव्यापकत्वग्रहे साध्यव्यापकत्वनिर्णये अनुमानमात्रमिति। संदिग्धसाध्य
कपक्षकानुमानमात्रमुच्छिद्येतेत्यर्थः। यथा श्रुते निश्चितसाध्यके व्यभिचारनिर्णायकसत्वेन पक्षे तस्य स्वसाध्यव्यापकत्वनिर्णयासंभवादनु
मानमात्रोच्छेदाभावात् अस्माकं तु पक्षे साध्यस्य संशयत्वेपि तद्धेतस्य साध्ये व्यभिचारसंशयसत्वादनुकूलतर्कं विना न साध्यव्यापकत्व
क्षेपः निर्णयसंभव इति भावः। अनुमानमात्रेति तादृशानुमानमात्रोच्छेदकत्वज्ञानस्य प्रतिकूलतर्कादित्यर्थः। सोपाधिः स्वव्यभिचारेण साध्यव्य
भिचारानुमापकः उपाधित्वेनेति व्यभिचारोन्नायकत्वेनेत्यर्थः। साध्यव्यापकत्वेन तन्निर्णयेन व्यापकव्यतिरेके व्याप्यव्यतिरेकज्ञाने व्याप्यव्य
तिरेकस्य व्याप्यव्यतिरेकज्ञानस्य न तु तादृशानुमानमात्रोच्छेदकत्वज्ञानमेव तत्र साध्यव्यापकताज्ञानविरोधी स्यात्स्वरसात् ह अपि चेति शत्रुप
तिरिक्तेति न चास्मन्मते साध्याप्रसिद्धिः परैः तैरेव परं प्रत्यभिधानात् स्वमते तु शक्तत्वादिरिक्तत्वबहिर्भावेन साध्यं वाच्यं न साधकं न लिंगं व्याप्यस्य व्या
प्यत्वेन निश्चितस्य। पक्षधर्मत्वेनं पक्षधर्मत्वनिर्णये न तत्र व्यभिचारसंशयसामग्रीसत्वेन न तत्र व्याप्तिनिर्णय इत्यर्थः। ननु उक्तव्याप्तीनां ज्ञा उदयितर्कः
नसमुच्चयो न हेतुरसंभवात् न च प्रत्येकं अननुगमात्। कस्यचिदेव ज्ञानं तथेत्यत्र तु विनिगमकाभाव इत्यत आह उक्तेति अनुमितिहेतुरिति व्या
प्तिज्ञानविषयतयानुमितिहेतुतावच्छेदकत्वेनेत्यर्थः। साध्यवादिति। प्रतियोगितावच्छेदकताघटकसंबंधेन प्रत्यतियोगितावच्छेदकावच्छिन्नं प्रतियोगिता राम०

८

वछेदकसंवंधेनतद्भिन्नत्वस्य हेत्वधिकरणविशेषणत्वेनासंताभावगर्भमपेक्ष्यापिलाघवादित्यर्थः अथान्योन्याभावगर्भलक्षणेपिप्रतियोगि
तावछेदकसंवंधेनप्रतियोगिमद्भिन्नत्वं हेत्वधिकरणविशेषणमावश्यकमन्यथासंयोगादिमदन्योन्याभावस्याव्याप्यवृत्तितानयेसंयोगिद्रव्य
त्वादिमादायव्याप्यवृत्तिसाध्यकेऽव्याप्तिः अन्योन्याभावस्याव्याप्यवृत्तित्वनियमनयेपिसंयोगादिमद्भेदस्याव्याप्यवृत्तितान्यमतेनाहेतुसामाना
धिकरणपक्षमेतत्रानुमित्यनुत्पादापत्तेश्चतथाचवक्ष्यलाघवं नचान्योन्याभावगर्भलक्षणेहेत्वधिकरणवृत्तित्वमेवनिरवच्छिन्नत्वेनविशेषणीयं
ननुयथोक्तप्रतियोगिमद्भिन्नत्वेनहेत्वधिकरणमतोलाघवमितिवाच्यं तथासत्यसंताभावगर्भलक्षणेपितथात्वस्यवक्तुमुचितत्वात्तथापिगौरवा
भावादितिचेन्नअन्योन्याभावगर्भलक्षणेनादृशप्रतियोगिमद्भिन्नत्वेनहेत्वधिकरणविशेषणेपिप्रतियोगितावछेदकतावछेदकसंवंधप्रति
योगितावछेदकसंवंधयोरप्रवेशात्स्वलाघवात् वस्तुतोऽन्योन्याभावगर्भलक्षणेप्रतियोगिभिन्नत्वं हेत्वधिकरणस्यप्रतियोग्यनिरूपितत्वंवा
हेत्वधिकरणवृत्तित्वस्यविशेषणं ननुयथोक्तंगौरवात् तथावासंताभावगर्भमपेक्ष्यातीवलाघवमितिभावः अत्रनव्याः अन्योन्याभावगर्भव्याप्ति
ताघटितव्याप्तिज्ञानमपिनानुमितिहेतुः किंतुसाध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानमेवानुमितिहेतुरतिलाघवात् तस्यदीक्षारस्ययागेनदर्शितः
केवलान्वयिनिभ्रमरूपव्याप्तिज्ञानादेवसर्वदानुमितिःसद्धेतौभ्रमभिन्नज्ञानात्स्वानुमितिनियमेमानाभावः भ्रमजनकदोषरहितस्यजनस्यकेवला

२१
मू०म०

नव्यऽनुमितिरसिद्धैव एवं द्रव्यं विशिष्टसत्वादित्यादावपि भ्रमरूपव्याप्तिज्ञानादेवानुमितिः न च साध्याभाववद्वृत्तित्वज्ञानस्यैव सर्वत्रानुमितिहेतु
त्वे पृथिव्यामितरभेदः ह्रदे धूमाभाववद् इत्याद्यप्रसिद्धसाध्यकानुमितिर्न स्यात् तत्र साध्यस्याप्रसिद्ध्या तदभाववद्वृत्तित्वज्ञानस्यासंभवादिति वा
च्येत्तत्र पृथिवीतरत्वधूमादेरेव साध्याभाववत्तया पृथिवीतरावृत्तिधूमवद्वृत्तित्वज्ञानस्यैव सर्वत्रानुमितिहेतुत्वात् भ्रमयात् तथापि साध्यस्याप्र
सिद्ध्या साध्याभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिज्ञानस्य तत्रासंभवात् तन्नु साध्याभाववद्वृत्तित्वज्ञानस्यैवानुमितिहेतुत्वे वाच्यत्वादैवं न्वा
दौ वा केवलान्वयित्वग्रहदशायामनुमितिर्न स्यात् विशेषदर्शनसत्वेनाभावे साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियो
गिताकत्वसंबंधेन साध्यवत्वज्ञानासंभवात्तथा पक्षसामानाधिकरण्यज्ञानस्यैवानुमितिहेतुत्वे हन्नीमप्यनुमित्युत्पादात् न च केवलान्वयित्वग्रहो
न्नरसंभवति साध्याभाववान् अभाव इत्याकारकाभाववत्तावच्छेदेनाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नस्य सा
ध्याभावस्य निर्णयः तादृशनिर्णयस्य निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानवदाहार्यभ्रमरूपत्वेनाप्रतिबंधकत्वात् नापि तादृशाकारकोऽभावत्व
सामानाधिकरण्येन साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नस्य साध्या राम०
भावस्य निश्चयः तत्सत्वेपि भ्रमभावत्वसामानाधिकरण्येनाभावे साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन

साध्यप्रकारकस्य साध्याभाववद्वृत्तित्वज्ञानस्यासत्त्वे बाधकाभावात् अंशतो बाधस्य विशेष्यतावच्छेदकसामानाधिकरण्येन विशेष्यतामि
द्धावविरोधित्वादिति वाच्यं। साध्यात्यंताभाववान् ह्रद इत्याकारकस्याभावत्वावच्छेदेनाभावे तादृशसंबंधावच्छिन्नसाध्यात्यंताभावनिरूपितरूपस्य साध्य
वद्भिन्नो ऽभाववद् इत्याकारकस्याभावत्वावच्छेदेनाभासाध्यवद्भ्यो ऽन्याभावनिरूपितरूपस्य च केवलान्वयित्वग्रहस्यानाहार्यस्यापि संभवात् अं
त्यंताभाववान्योन्याभाववत्वादेरखंडधर्मविशेषत्वेनावघटितत्वात् वाच्यत्वाभाववान् अभाव इत्याकारकस्यासंभवेपि तादृशाकारस्याभावत्वा
वच्छेदेन स्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकवाच्यत्वाभाववत्ताज्ञानस्यानाहार्यस्यासंभ
वात्रेति चेन्न तादृशकेवलान्वयित्वग्रहदशायां अनुमितेरप्रसिद्धेः अन्योन्याभावत्वावच्छेदेन हेतुसामानाधिकरण्याभावग्रहदशायां अनुमित
नुमादकस्य तथा व्यक्तत्वेन क्वचित्फलाभावस्याविशेषत्वस्कृतस्तसाध्याभाववद्वृत्तित्वरूपव्याप्तिवत्वेन तिविशपते गौरवात् प्रयोज
नाभावाच्च किंतु साध्याभाववद्वृत्तित्वज्ञानमेव हेतुः तच्च पर्योक्तकेवलान्वयित्वग्रहदशायामपि संभवति साध्यांशे निर्धर्मितावच्छेदकत्वात् नन्व
तथापि साध्याभाववद्वृत्तित्वज्ञानस्यैवानुमितिहेतुत्वे घटो ऽव्यभिचारादिस्वरूपतो ऽदुष्टत्वादिविधेयिकानुमितिः कदाचिदपि न स्यात् सा
ध्याभाववद्वृत्तित्वस्य दुष्टत्वादिरूपसाध्यतावच्छेदकघटितत्वेन दुष्टत्वाद्यवच्छिन्नविधेयकानुमितित्वस्यैव तद्दुर्दुः कार्यतावच्छेदकत्वाद

९२
मु०म०

व्याप्याऽतिप्रसंगात् द्रव्यत्वव्याप्यातिरिक्तानवच्छिन्नद्रव्यत्वादिविधेयकानुमितित्वस्य कार्यतावच्छेदकत्वे द्रव्यत्वव्याप्यानुमितेर्नियमतो द्विविधवि
षयत्वप्रसंगात् नच द्रव्यत्वसाध्याभाववद्वृत्तित्वरूपव्याप्तिग्रहे साध्यतावच्छेदकसंबंधेन साध्य द्रव्यत्वादेः स्वरूपतोभाप्रकारकत्वं तत्र स्वरूप
तो द्रव्यत्वादिविधेयकानुमिति यत्र च भेदेग्रहे तादृशसंबंधेन द्रव्यत्वादिरूपेणासाध्यस्य द्रव्यत्वादेः प्रकारत्वं तत्र द्रव्यत्वव्याप्यवच्छिन्नविधेयिकेति
कार्यकारणभावे भेदान्न नियमतो द्विविधविषयत्वमिति वाच्यं अभावप्रत्यक्षे हि प्रतियोगिनि तद्धर्मवैशिष्ट्यमवगाहमानस्य तद्धर्मस्यावच्छेदकत्व
मवगाहते न तु तद्व्याप्यत्वेनेति नियमात् द्रव्यत्वव्याप्यवच्छिन्नप्रतियोगिताकत्वसंबंधेन स्वरूपतो द्रव्यत्वादेरभावे प्रकारत्वासंभवादिति चेन्न स्वरूपतो द्रव्य
त्वादिविधेयकानुमितेरसिद्धेः अभावप्रत्यक्षे हीति नियमस्यैवाप्रसिद्धेः यदि च तादृशानुमितिरपि प्रामाणिकी तन्नियमोऽपि च प्रामाणिकः तदा द्र
व्यत्वसाध्याभाववद्वृत्तित्वज्ञानमेव हेतुस्तादृशानुमितौ च द्रव्याभाववद्वृत्तित्वादिरूपव्याप्तिज्ञानं हेतुरित्याहुः नच व्योमाभावगर्भव्याप्तिज्ञानस्यैकानु
मितिहेतुत्वे औपाधिकत्वज्ञानमनुमितिहेतुरिति प्रामाणिकप्रवादविरोधः इत्यत आह अनौपाधिकत्वं त्विति तद्घटकतामिति लिंगविधया व्याप
व्योमाभावगर्भव्याप्तिज्ञापनविषयतयाऽनुमितिकारणतावच्छेदकं स्यात् तदा तदभावव्याप्तेरसिद्धत्वेन प्रविशेत् अनुमितिजनकतावच्छेदकव्या
प्तेरभावसाध्यव्याप्यत्वासिद्धत्वात् यदि नैवं तदा उपाधेर्हेत्वाभासान्तरं स्यादिति शंकते नन्वेवमिति एवं अनौपाधिकत्वरूपव्याप्तिज्ञानस्यानुमितिहेतुत्वे असिद्धु

राम०
९२

पजीव्यत्वेनेति आप्यानिर्णायप्रयोजकज्ञानविषयत्वेनेत्यर्थः इदं हेत्वाभावसत्त्वे हेतुः ननु हेत्वाभासांतरत्वे हेत्वाभासांतरत्वे हेत्वाभासांतरं स्यात्व्या
प्यत्वासिद्धिभिन्नहेत्वाभासः स्यात् आप्याभावत्वेनानुमितिहेतुज्ञानविषयतावच्छेदकव्याप्याभावत्वेनाप्रसिद्धिः आप्यत्वासिद्धिः उपजीव्यमपीति
परंपरया व्याप्तिनिर्णायोपजीव्यमपीत्यर्थः। स्वतो रक्षकमिति अनुमितितत्कारणपरामर्शान्यतरं प्रतिसाक्षात्प्रतिबंधकमित्यर्थः तयोरन्यतरस्यै
ति – साक्षात्प्रतिबंधकं यत्तज्ज्ञानं तद्विषय एव च हेत्वाभास इति भावः एतदेव स्पष्टयति नह्यस्येति हेतुत्वात्व्याप्तिधीहेतुत्वात् तद्धीव्यभिचारधीः त
थात्वतः प्रतिबंधिका अनौपाधिकत्वतानमिति उपाधिमत्त्वज्ञानाभाववत्त्वमर्थः येनोपाधिज्ञानं व्यभिचारज्ञानवद्धस्ततः प्रतिबंधकं स्यादिति भावः तत्
त्किंउपाधिर्दूषणमेव नेत्यत आह तथा चेति उपसंहरति एवं चेति पक्षस्तु रवनिरीक्षणत्वेति अनुमितितत्कारणपरामर्शान्यतरप्रतिबंधकज्ञान
विषये इत्यर्थः। सिद्धसाधनवदिति पक्षविशेष्यकसाध्यप्रकारकनिश्चयवदित्यर्थः हेत्वाभासत्वाभावे नेति शेषः न पृथक् न पृथक् हेत्वाभासः अन्यथा
अनौपाधिकत्वज्ञानस्यानुमितिहेतुत्वपक्षेप्युपाधेर्हेत्वाभासांतरत्वस्य दुर्वाप्यत्वासिद्ध्यंतर्भावासंभवादिति भावः स्यैव निर्वचत्वात् उपाधेस्तभावत्वा
देनाप्यत्वासिद्ध्यंतर्भावासंभवादिति भावः सिद्धसाधनवदिति च हेत्वाभासत्वाभावे दृष्टांत ननु पक्षस्तु रवनिरीक्षकतायां तत्र पक्षे कथं पक्षस्तु रवनिरी
क्षकत्वाभावादिति चेद्यं किंत्विति अत्राव्यभिचार इत्यनुषज्यते अग्रेयोरिति साध्याभाववद्वृत्तित्वसमानाधिकरणाभावाप्रतियोगिसाध्यसामानाधि

करणयोरित्यर्थः व्याप्तिग्रहोपायरहस्यं प्रसंगसंगत्यासामान्यलक्षणायाः प्रत्यासत्तितां व्यवस्थापयितुमाह व्याप्तिग्रहश्चेति महानसादेरा
पमानो धूमत्वरूपेण संनिकृष्टधूमे वह्नित्वरूपेण संनिकृष्टवह्नेर्व्याप्तिसाक्षात्कारश्चेत्यर्थः सामान्यलक्षणाप्रत्यासत्त्येति धूमत्ववह्नित्वसामा
नाधिकरण्यत्वरूपसामान्यप्रत्यासत्त्येत्यर्थः सकलधूमादीति आदिपदात् सकलवह्नीधूमवत्ति सकलतत्सामानाधिकरणयोः परिग्रहः क
थमन्यथेति अन्यथा तस्य सकलधूमाविषयकत्वे पर्वतीयधूम इति पर्वतेधूमत्वरूपेण पर्वतीयधूमवत्तानिश्चयस्य पर्वतीयधू
मे व्याप्तिप्रकारकत्वासंभवइत्यर्थः विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयस्य हेतुतया व्याप्तिप्रकारेण पर्वतीय
धूमं विना पर्वते व्याप्तिविशिष्टधूमवैशिष्ट्यज्ञानासंभवादिति भावः तस्मादनुमितिरिति पर्वतेधूमत्वरूपेण तद्वत्तानिश्चयादनुमितिरित्य
र्थः व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयस्यैव लाघवादनुमितिहेतुत्वादिति भावः ननु सा किं संयोगादिलक्षणायाः प्रत्यासत्त्यंतर्गता तदति
रिक्ता वेत्यत आह सा चेति इंद्रियसंबद्ध इति स्वजन्यज्ञानप्रकारत्वरूपेंद्रियसंबंधाश्रयस्य सामान्यस्य व्याप्तिबुद्धिर्भिन्ना स्वाख्यरूपसंबंधसत्वादि
त्यर्थः स्वामिंद्रियं तथा च सामान्यलक्षणां निरूपकं यस्या इति व्युत्पत्त्या वस्तुतः स्वजन्यज्ञानप्रकारीभूतधूमत्वादिसामान्यनिरूपिताधर्मिताख्यविशे 
षणतैव सामान्यलक्षणा सा चाभावादिग्रहे चक्षुःसंयुक्तविशेषणतावद्विशेषणताप्रत्यासत्त्यंतर्गतैव न चैवं धूमत्वादिप्रकारकसाक्षात्कारस्य

सादितः सकलधूमादिगोचरो मानसो बोधो न स्यात् तत्र मनोजन्यज्ञानविरहादिति वाच्यं शाब्दादेरपि मनोजन्यत्वात् न च तथापि धूमत्वादिप्रकारक
शाब्दबोधादितो निखिलधूमादिगोचरचाक्षुषादिर्न स्यादिति वाच्यं इष्टत्वात् प्राचीनैः तत्प्रकारकचाक्षुषादितः सकलतदाश्रयचाक्षुषाद्यनु
यगमादिति भावः अत्र धूमत्वादिसामान्यनिरूपितधर्मितामात्रस्य प्रत्यासत्तित्वे धूमत्वादेर्ज्ञानदशायामिव विकल्पकज्ञानदशायां विशे
ष्यतया तज्ज्ञानादिदशायां च तत्प्रकारेण तदाश्रयप्रत्यक्षापत्तिः समवायाद्येकसंबंधेन धूमत्वादिप्रकारकज्ञानदशायां कालिकादिसकलसं
बंधेन तस्य ज्ञाने प्रकारत्वे तत्संबंधावच्छिन्नतद्दीयधर्मितात्संबंधेन तदाश्रयस्य प्रत्यक्षे हेतुरिति नोक्तातिप्रसंग एतेन स्वलौकिकसंनिकर्षाश्रय
प्रकारकज्ञानत्वमेवेंद्रियसंबंधोऽभिधीयतामित्यपि निरस्तं यथोक्तातिप्रसंगानां दुर्वारत्वापत्तेः धूमादौ धूमत्वादिप्रकारकज्ञानानंतरं सकलधूमा
दिगोचरमानसप्रत्यक्षानुदयापत्तेश्च धूमत्वादेर्मनोलौकिकसंनिकृष्टावृत्तित्वात् चक्षुरादिसंनिकृष्टे धूलीपटले धूमत्वभ्रमे सकलधूमसा
क्षात्कारानुदयापत्तेश्च धूमत्वस्येंद्रियसंनिकृष्टवृत्तित्वात् धूमत्वादिप्रकारकस्मरणादितोपि चक्षुरादिबहिरिंद्रियजन्यसकलतदाश्रयसा
क्षात्कारस्वारस्यायतादृशपरंपरया इंद्रियसंबंधत्वसंभवाच्च चक्षु [redacted] रादिजन्येति ज्ञानविशेषणं तज्जनकार्यकारताभावनविघं
चक्षुरादिबहिरिंद्रियस्यात्वे चक्षुरादिजन्यत्वमियतया चाक्षुषत्वादिजातेर्मानसस्थले तु जन्यज्ञानमात्रस्य मनोजन्यतया ज्ञानत्वमात्रस्य कारणताव

५

मू० म० च्छेदकघटकत्वात् लाघवात् तथा च वहिरिंद्रियस्पर्शनेतत्सुरभीयवास्तुषद्विशिष्टधर्म्मत्वविशिष्टधर्म्मितात्वेन कारणता तत्सुरभीयधूमत्वप्रकारक
धूमत्वाश्रयमुख्यविशेष्यकवास्तुषत्वेन कार्यतेत्यादिक्रमेणामनःस्थलेतु तत्सुरभीयज्ञानविशिष्टधूमत्वविशिष्टधर्म्मितात्वेन कारणता तत्सु
रभीयधूमत्वप्रकारकधूमत्वाश्रयमुख्यविशेष्यकमानसत्वेन कार्यतेत्यादिक्रमेण कार्यकारणभावः प्रथमे वैशिष्ट्यं प्रकारतासंबंधेनोद्धु
तीयवैशिष्ट्यं च निरूपितत्वसंबंधेन विशिष्टवत्त्वस्यापेक्षिततया च न कालांतरीयचाक्षुषादिकमादायातिप्रसंगः कालिकसामानाधिकरण्यप्रत्या
संबंधप्रत्यासत्तिर् न विशेष्यत्वाश्रयत्वघटितवैशिकसामानाधिकरण्यप्रतिधूमत्वादिप्रकारकज्ञानानंतरं निरुक्तधर्म्मितारूपसामान्यलक्ष
णाप्रत्यासत्त्याऽतीतानागतधूमादौ कदाचित्समूहालंबनविधया धूलीपटलादौ धूमत्वादिप्रत्यक्षोदयात् न च तदानीं तादृशधर्म्मिताविरहाद्व्यभिचा
रायत्तेन न च यावत्त्वस्य कार्यतावच्छेदकाघटतया तादृशधर्म्मितारूपसामान्यलक्षणाप्रत्यासत्त्याऽकुतोऽतीतानागतसकलधूमाश्रयप्र
त्यक्षमितिवाच्यं यावत्त्वस्य कार्यतावच्छेदकाघटकत्वेपि विनिगमनाविरहेण सकलधूमत्वाश्रयप्रत्यक्षमानादिति निगर्वः न च यत्र दिनद्वयस्य च
क्षुःसंयोगेन पश्चात् किंचिद्वह्नौ धूमत्वप्रकारकचाक्षुषोत्पत्तिकालस्य च चक्षुषो निमीलनं तत्र तदनंतरं निमिलितनयनस्यापि तादृशधर्म्मिताप्रत्यासत्त्या राम०
धूमत्वत्वप्रकारकनिखिलधूमत्वाश्रयचाक्षुषापत्तिः एवं यत्र धूमत्वप्रकारकप्रमाविषयात्किंचिद्धूमाद्याप्ति चाक्षुषोत्पत्तिकाले धूमत्वप्रकारकलौकि

कचाक्षुषप्रतिबंधसंयोगसत्तित्वतत्त्वंतरंदोषसपितादृशधर्मितासन्निकर्षेणाधूमत्वप्रकारकयत्किंचिद्धूमचाक्षुषादंधंतमस्यपितादृश
धर्मिताप्रसासस्याधूमत्वप्रकारकनिखिलधूमचाक्षुषापत्तिरितिवाच्यं वहिरिंद्रियजनितसामान्यलक्षणाजनितसाक्षात्कारत्वसामान्यांशेवि
शेषणीभूतयत्किंचिद्धर्मवंशेलौकिकत्वनियमाद्बहिरिंद्रियेणतादृशसाक्षात्कारजननेसामान्याश्रयेतदनाश्रयेवायत्किंचिद्धर्मिणिलौ
किकविशेष्यतयासामान्यप्रकारकतादृशेंद्रियकरणकप्रत्यक्षोत्पत्तिसामग्र्याअपिसहकारित्वस्यनव्यसकलतांत्रिकसिद्धत्वात् अन्यथा
वक्ष्यमाणाकल्पेनापिअनिस्तारादितिदिक् एवंचज्ञानप्रकारीभूतैर्यैर्निरूपितधर्मितापास्तत्प्रकारकतदाश्रयप्रत्यक्षस्यएवहेतुतयाघटत्वेन
रूपेणएकव्यक्तिघटमात्रप्रकारकानंतरंघटत्वावच्छिन्नाघटत्वरूपप्रकारेणघटांतराश्रयप्रत्यक्षंनस्यात् घटांतराश्रयस्यज्ञानप्रकारीभू
तन्निरूपीतधर्मितायाःतत्प्रकारकतदाश्रयप्रत्यक्षएवहेतुतयाघटत्वरूपेणएकव्यक्तिमात्रप्रकारकानंतरंघटत्वावच्छिन्नघटत्वप्रका
रेणघटांतराश्रयप्रत्यक्षंनस्यात् घटांतराश्रयज्ञानप्रकारीभूतघटव्यक्तिनिरूपिताश्रयत्वाभावात् नचसामान्यतत्पुरुषीयचाक्षुषविशिष्ट
घटविशिष्टधर्मितात्वेनतत्पुरुषीयघटप्रकारकघटाश्रयचाक्षुषविशिष्टधर्मितात्वेनतत्पुरुषीयघटप्रकारकघटाश्रयचाक्षुषत्वेनकालिक
सामानाधिकरण्यमात्रप्रसाससत्त्वाकार्यकारणभावात्ज्ञानप्रकारीभूतयत्किंचित्घटव्यक्तिनिरूपितधर्मितेवत्त्वानधिकरणीभूतघटांतराश्रयप्रत

मू० म० क्षेपिहेतुरितिवाच्यं तथासतितद्व्यक्तित्वरूपेणोक्तवह्निघटमात्रप्रकारकज्ञानानंतरमपीघटप्रकारकघटंतराश्रयप्रत्यक्षापत्तेरितिसैव घ
टत्वावच्छिन्नघटप्रकारकतत्पुरुषीयघटाश्रयचाक्षुषंप्रतिघटत्वावच्छिन्नप्रकारतासंबंधेनतत्पुरुषीयचाक्षुषविशिष्टेनयत्किंचिद्धटेनवि
शिष्टासाधर्म्यताया एवहेतुत्वात तत्तद्व्यक्तित्वरूपेणतद्व्यक्तिप्रकारकज्ञानस्यतत्तद्व्यक्तित्वावच्छिन्नतद्व्यक्तिप्रकारकतद्व्यक्तिप्रकारकतद्व्यक्त्या
श्रयप्रत्यक्षंप्रत्येवहेतुत्वात एवमेवसर्वत्रसर्वऽसामान्यानामस्यास्तेवोध्यं सामान्यभेदेनकार्यकारणभावभेदात नन्वस्वधर्मिताप्रवेशोव्यर्थः
तादृशविशिष्टधूमत्वत्वादिनैवहेतुत्वसंभवात किंचैवंप्रतीतीतमनागतवासामान्यंतन्निरूपितधर्मितायाआधिश्रतीतानागतयात
सामान्यज्ञानानंतरंतत्सामान्यप्रकारकनिखिलतत्सामान्याश्रयसाक्षात्कारोनस्यात ज्ञानप्रकारीभूतस्यतत्सामान्यस्यतन्निरूपितधर्मिताया
श्चाव्यवहितपूर्वमभावात अथातीतानागतसामान्यप्रकारकज्ञानांतंतरंतादृशसामान्यप्रकारकतादृशसामान्याश्रयसाक्षात्कारोऽसिद्धःकार्य
कारणभावस्यअविचारपसात् तथैवकल्पनात किंतुतत्रातातानागतसामान्यप्रकारकज्ञानेभासमानंसाक्षात्परंपरयातत्सामान्यनिष्ठमव
श्यंनिसंधर्मांतरमस्तिपरंपरासंबंधावच्छिन्नतादृशनिष्ठधर्मनिरूपितधर्मिताप्रत्यासत्त्यापरंपरासंबंधेनतादृशनिष्ठधर्मप्रकारकमेवतत्सा राम०
मान्यप्रकारकतत्सामान्याश्रयप्रत्यक्षंजायते नचतादृशनिष्ठधर्मस्यपरंपरासंबंधेनज्ञानाप्रकारतया कथंतन्निरूपितधर्मिताप्रत्यासत्त्यापरंपरासंबं

धेनतादृशानित्यधर्मप्रकारकं तत्सामान्याश्रयप्रत्यक्षमितिवाच्यं यत्किंचिद्विशेष्येप्यतीतानागतसामान्यप्रकारकत्वनदशायां अंततोनित्यधर्मिता
वच्छेदकस्यापि तस्मिन् विशेष्ये परंपरासंबंधेन तत्सामान्यवृत्तितादृशानित्यधर्मप्रकारकप्रत्यक्षस्यसंभवात् यत्र शाब्दबोधादिरूपातीतानागत
सामान्यप्रकारकज्ञानं तत्रापि तदुत्तरं परंपरासंबंधेन तद्वृत्तितादृशधर्मप्रकारकमानसबोधकल्पनादिति चेन्न अनुभवापत्तापातात् अतीतानाग
तसामान्यप्रकारक[redacted]ज्ञानानंतरं अतीतानागतसामान्यप्रकारकस्यापि निखिलतदाश्रयसाक्षात्कारस्य सकलजनैर्यावदपि अतीता
नागतसामान्यप्रकारकाशाब्दादित सकलतदाश्रयसाक्षात्कारस्य सकलजनैर्यावदिकानुभवसिद्धत्वाच्च अन्यथा अतीतानागतसामान्यप्रकारकज्ञा
नानंतरं निखिलतदाश्रयसाक्षात्कारएवायस्यतां किमेतावत्सुसह्यापि चक्षुरादिजन्यज्ञानप्रकारीभूतसामान्यनिरूपितधर्मितयास्तादृशसा
मान्यस्यवापत्तेरासत्तित्वेरिंद्रियभेदेन पुरुषभेदेन पुरुषभेदेन च कार्यकारणभावसंगःकारणतावच्छेदकशरीरयोरवंधे मत्स्वरसाप्तह इत्यतिप्र
हैवेति संयोगादिलक्षणाप्रत्यासत्तिघटकादतिरिक्तेव वेन्यर्थः तच्चातिरिक्तं धूमत्वादिरूपसामान्यप्रकारकज्ञानमात्रं योठापरिगणानं तु
लौकिकसंनिकर्षाभिप्रायं सामान्यलक्षणायद्रस्य च सामान्यं लक्षणं विषयेतानिरूपकं यस्या सामान्यलक्षणेति व्युत्पत्तिः धूमत्वादिप्रकारक
शाब्दस्मृत्यादितोपिमानसप्रत्यक्षलधूमादिसाक्षात्कारकज्ञ चक्षुरादिबहिरिंद्रियजन्यानिखिर धूमादिसाक्षात्कारोपि प्रतएवनानोबहिरिंद्रियादि

स्थले चास्तु घटादिभेदेन कार्यकारणभावभेदः समवायसंबंधेनात्मनिष्ठतया हेतुतया च न पुरुषभेदेन कार्यकारणभावभेद इति भावः॥ अत्र सामा
न्यमात्रस्य प्रत्यासत्तित्वे तु अतीतानागतसामान्यप्रकारकज्ञानानंतरं तत्प्रकारकनिखिलतदाश्रयप्रत्यक्षात्कारानुपपत्ति कारणत्वेनाभिमतस्य
सामान्यस्याव्यवहितपूर्वमभावात् अतो ज्ञानप्रवेशः ननु एतावता नित्यसामान्यस्थले घटत्वादिनित्यज्ञानं प्रत्यासत्तिरस्तु घटत्वत्वादिना कार
णत्वकल्पने स्पष्टघटत्वादितानंत्येन हेतुतावच्छेदकलघुत्वात् परममहत्त्वादिनित्यगुणाद्यात्मकसामान्यस्थले घटात्यंताभावादिति साभावात्मक
सामान्यस्थले चैकघटज्ञानांतर्भावः सामान्यभेदेन कार्यकारणभावभेदात् तत्र स्वरूपसत्परममहत्त्वादेरेव लाघवेन प्रत्यासत्तित्वोचितत्वात् न
चैवं परममहत्त्वादेरज्ञानदशायामपि तदाश्रयसकलनिखिलतदाश्रयसाक्षात्कारापत्तिरिति वाच्यं परममहत्त्वादिप्रकारकपरममहत्त्वाश्र
यप्रत्यक्षत्वस्य कार्यतावच्छेदकतया विशेषणज्ञानरूपविशिष्टबुद्धिसामान्यकारणाभावादेव तत्र कार्याभावादिति चेन्न परममहत्त्वादिनि
र्विकल्पकानंतरमाद्यवैशिष्ट्यज्ञानोत्पत्तिसमय एव परममहत्त्वादिनिखिलतदाश्रयसाक्षात्कारापत्ते परममहत्त्वादिविशेष्यकतानादपि सत्तदा
श्रयसाक्षात्कारापत्तेश्च न चेष्टापत्तिरनुभवविरोधात् एवं समवायादिघटितकिंचित्संबंधेन परममहत्त्वादिप्रकारकज्ञाने तत्प्रत्यासत्तिजगत एव प्रत्यक्षा राम०
पत्तिश्च जगत एव येन केनचित्संबंधेन परममहत्त्वाद्याश्रयत्वात् विनाकारणतावच्छेदके प्रकारिताप्रवेशे संबंधभेदापादानस्याशक्यत्वात् न चैवं

पत्तिरनुभवविरोधात् परममहत्वादेर्निखतयात्तदभावेन कार्याभावस्यव्याप्यसत्वात् स्वरूपसत्वस्य कारणत्वेमानाभावाच्च नचतथापिला
घवादीछादिसाधारणसामान्यप्रकारकमेव प्रमासामिरस्तुकिं ज्ञानत्वांतर्भावेनेतिवाच्यं घटत्वादिविशिष्टकप्रकारकस्य घटत्वादिविशेष्यकप्र
नात्मकस्यवा विशेषणज्ञानस्यसत्वेघटत्वादिप्रकारेच्छादितोघटत्वादिप्रकानुद्बुद्धसंस्काराद्युत्तिविसघटत्वाधस्य यसाक्षात्कारापत्तेः नच
सामान्यप्रकारकज्ञानस्यैव सामान्यलक्षणात्वेनज्ञानलक्षणासामान्यलक्षणयोः कार्यकारणभावेकोभेदइतिवाच्यं कारणतावच्छेदकभे
देनकार्यतावच्छेदकभेदेनचभेदात् सामान्यलक्षणायाः कार्यकारणभावस्तु तत्तत्संबंधावच्छिन्नघटत्वादिप्रकारिताशालिज्ञानत्वेन स्वस्व
रूपतत्तत्संबंधावच्छिन्नघटत्वादिप्रकारिताकतत्तत्संबंधावच्छिन्नघटत्वाद्याश्रयताशालिमुख्यविशेष्यकप्रकारकत्वेन याथत्वस्य कार्यता
वच्छेदकाघटकत्वेपिविनिगमनाविरहेणसकलघटभानं समवायसंबंधेनघटप्रकारकज्ञानानंतरं कालिकादिसंबंधेनघटत्वप्रकारकनि
खिलघटविषयकप्रत्यक्षस्यसमवायसंबंधेनघटत्वप्रकारेणघटत्ववतः कालादेः प्रत्यक्षस्यचवारणायसंबंधांतर्भावः घटत्वादिप्रकारकज्ञा
नंविनापिद्रव्यत्वादिसामान्यलक्षणयाजायमानेद्रव्यत्वादिप्रकारकघटादिमुख्यविशेष्यकप्रत्यक्षेव्यभिचारवारणाय कार्यतावच्छेदकेघटत्वादि
प्रकारिताकेति प्रकारित्वंचालौकिकंग्राह्यं तेनघटत्वप्रकारकज्ञानंविनापिद्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वनिर्विकल्पकानंतरंघटत्वसामान्यलक्षणया

मु०म०

जायमानेयावद्घटमुख्यविशेष्यकप्रत्यक्षेलौकिकसंनिकर्षमर्यादयाघटत्वप्रकारकेनव्यभिचारः नचतथापिकालिकादिसंबंधेनस्वरूपा
तोघटत्वादिप्रकारकबुद्ध्यात्मकघटवादिविशेष्यकसमवायसंसर्गकघटत्वादिप्रकारकस्मरणोत्तरं उत्पन्नसामान्यलक्षणयाजायमानेयाव
द्घटमुख्यविशेष्यकप्रत्यक्षेउपनयमर्यादयासमवायसंसंबंधेनस्वरूपतोघटत्वप्रकारकेव्यभिचारइतिवाच्यं यथोक्तकार्यकारणभावस्यैव
बाधकत्वेनतत्रसमवायसंबंधेनघटत्वस्यापिप्रकारत्वात् घटत्वप्रकारकज्ञानेक्वापिजातित्वरूपेणगोत्वादिजात्यंतरप्रकारकज्ञानाजा
यमानेजातित्वरूपेणघटत्वादिविशिष्टजातिप्रकारकज्ञानविलक्षणप्रत्यक्षेव्यभिचारवारणायस्वरूपतइति घटत्वादिप्रकारिताविशे
षणं यथोक्तकार्यकारणभावस्यैवबाधकत्वेनप्रकृतकस्मयंचिदपिस्वरूपतोघटत्वादेरप्रकारत्वात्कालिकासंबंधेनस्वरूपतोघटत्वादिप्र दि
कारकस्मरणादितोजायमानेविशेष्येविशेषणतामितिरीत्यासमवायसंबंधेनघटत्वादिप्रकारकघटवदिदमितिसूपनीतभानेऽव्यभिचारवा
रणायमुख्यविशेष्यत्वप्रवेशः उपनीयभानेचघटेनमुख्यविशेष्यः बहिरिंद्रियस्यासेउपनीतंविशेषणतयैवभानस्तदइतिनियमात् मुख्यवि
शेष्यत्वंमप्यलौकिकरूपंयात्यं तेनकालिकादिसंबंधेनस्वरूपतोघटत्वस्मरणाल्लौकिकसंनिकर्षभावाज्जायमानेषुसमवायसंबंधावच्छिन्नलौ राम०
किकालौकिकोभयघटत्वप्रकारताशालिन्यपिघटइतिघटमुख्यकलौकिकप्रत्यक्षेनव्यभिचारः अथतथापिकालिकादिसंबंधेनघटत्वादिप्रकार

कघटविशेष्यकस्मरणाज्जायमाने समवायसंबंधेन घटत्वप्रकारकघटमुख्यविशेष्यकमानसोपनीतमानसभिचारः मानसेऽपनीतं विशेषणा
तयैवभासतइतिनियमाभावात् तच्चकालिकादिसंबंधेनैव घटत्वप्रकारेणैव घटघटत्वं न तु समवायसंबंधेन मुक्तावपि घटत्वादीति स्मरणोत्तरं जा
यमानेपरंपरासंबंधेनैव घटत्वप्रकारकमानसोपनीतभानेव्यभिचारो दुर्वारः तदनभ्युपगमे तादृशस्मरणोत्तरमपि निर्विकल्पकप्रत्ययसाक्षात्का
रानुपपत्ति द्रव्यप्रकारकज्ञानस्याप्रमा। सत्तिवादितिचेन्न लाघवाद्यथोक्तरूपेणासामान्यलक्षणायाः कार्यकारणभावकल्पनेयथोक्तमानसेघ
टादिर्नमुख्यविशेष्यं किं तु चक्षुरूहवत् घटत्वादिघटितवानवभासते इत्येवकल्प्यते यथोक्तकार्यकारणभावस्यैव बाधत्वात् तदनंतरोपनी
तभानानामत्वप्रवेशे गौरवात् सर्वत्रैव मानसोपनीतभावेऽपनीतमवश्यं मुख्यविशेष्यतयाभासतइति नियमेमानाभावात् असतिवाधएव
मानसोपनीतभानेऽपनीतस्य प्रकारत्वमुख्यविशेष्यत्वलक्षणाद्विविधविषयत्वाभ्युपगमात् न च तथापियोगजविशिष्टज्ञाने विशेषणा
ज्ञानस्याहेतुत्वमपेसामान्यज्ञानं विनापिजायमाने सामान्यप्रकारकसामान्याश्रयमुख्यविविशेष्यकप्रमाक्षे व्यभिचार इति वाच्यं योगजधर्मजन्या
तावच्छेदकतज्जात्यवच्छिन्नान्यत्वेन प्रमायां प्रति शेषणात् तादृशयोगजज्ञानेपि सामान्याश्रयमुख्यतयाभाने मानाभावाच्च अपि तु चक्षुरूहवत्स्व
प्रकारीभूतेसामान्येप्रकारीभूयैवभासने लाघवात् तथैव कल्पनात् अत एव कालिकादिसंबंधेन स्वरूपतो घटत्वप्रकारकस्मरणोत्तरं विशेष्ये विशेषणा

तिरीत्याकालिकादिसंबंधेनैव घटत्वप्रकारकघटवदिदमित्युपनीतमानंजायतेनतुसमवायसंबंधेनघटत्वप्रकारकमित्युक्तौवेवव्यभिचारवा
रणासंभवात् आसादिसामान्यलक्षणायाः कार्यतावच्छेदकेस्वरूपतःप्रकारताघटितेमुख्यविशेष्यत्वप्रवेशेनचतथाप्यत्रघटत्वाभिसमवा
यसंबंधेनघटत्वविशेष्यकस्मरणोत्तरंजायमानेविशेष्येविशेषणमितिरीत्याघटत्वप्रकारकघटवदिदमित्युपनीतमानेव्यभिचार
वारणायतद्धर्मप्यंनिवेशनौवेशेनीयमितिवाच्यं स्वरूपतोघटत्वविशिष्टबुद्धिंप्रतिस्वरूपतोविशेषणीभूतघटत्वविषयकज्ञानस्यहेतु
तयातादृशस्मरणोत्तरंतादृशोपनीतभानासंभवात् घटत्वघटकतयैवस्वरूपतोघटत्वभानाभ्युपगमेव्यभिचारस्यापिविरहादिति
स्मात्पूर्वपक्षोपिनिरस्तः घटवदिदमितिस्मरणोत्तरं जायमानेपरंपरासंबंधेनघटत्वप्रकारकमानसोपनीतमानेयथोक्तरीत्यायोगजधर्मजन्ये
घटत्वप्रकारकघटविशेष्यकप्रत्यक्षेव्यभिचारवारणायतत्प्रवेशस्यावश्यकत्वात् एतेनाभावत्वाद्यखंडोपाधिपाधिरूपसामान्यलक्षणाया
अपिकार्यकारणभावोव्याख्यातः जातिस्वखंडोपाध्यतिरिक्तपदार्थज्ञानंचप्रत्यासत्तिरित्वनेतिसामान्येपदार्थविशिष्टपरत्वस्वमतिपादनं नन्वेवंरूपे
णकार्यकारणभावेजातिस्वरूपेणैवजातिव्यक्तिमात्रप्रकारकज्ञानमनानंतरंजातित्वावच्छिन्नजातिमत्त्वप्रकारेणनिखिलजात्याश्रयप्रत्यक्षंस्यात् जातेरा
राश्रयस्यज्ञानप्रकारीभूतजातिव्यक्तेराश्रयत्वाभावात् स्वरूपतोघटत्वादिप्रकारकत्वस्यकार्यतावच्छेदकत्वान्नेतिचेन्न जातित्वरूपेणातिप्रकारकलौकिक

प्रत्यक्षदशायामंततो निर्द्धर्मितावच्छेदकस्यापि परंपरासंबंधेन जातित्वघटनित्यत्वादिप्रकारीभूतस्य सत्ताद्यखंडोपाधिप्रकारकज्ञानस्यावश्य
कतया अत एव सामान्यज्ञानाज्जातित्वावच्छिन्नजातीयत्वरूपेणानिखिलजात्याश्रयस्य साक्षात्कारात् जात्यंतराश्रयस्यापि परंपरासंबंधेन तदाश्र
यसत्ताद्यजातिरूपेणायत्किंचिज्जातिमात्रप्रकारकशाब्दस्यत्वादिधीस्तत्रापि साध्ये परंपरासंबंधेन ध्वंसत्वादिप्रकारकमानसोपनीतभानात्
तस्यैव जातिमतः सर्वस्य प्रत्यक्षाभ्युपगमात् लक्षणाविसंवेक्ष्यति विरहात् नच परंपरासंबंधेन ध्वंससत्वादिप्रकारकज्ञानस्यैव प्रत्यासत्तित्वे ध्वं
सत्वादिरेव तत्र फलं स्यात् नचु जातिमदिति सामान्यप्रकारकज्ञानस्य विशेष्ये सामर्थ्यप्रकारकज्ञानजनकत्वनियमादिति वाच्यं विशेषणा
ज्ञानार्थं जातित्वघटकसामान्यलक्षणाया मध्ये सकलजातिमुख्यविशेष्यकज्ञानस्यावश्यकत्वेन ज्ञानलक्षणायैव जातिमदिति फलस्यापि
संभवादेतद्विविधविषयत्वस्यचेष्टत्वात् एवं तद्व्यक्तित्वरूपेणाघटत्वादिप्रकारकज्ञानानंतरं ज्ञायमाने तद्व्यक्तित्वरूपेणाघटत्वादिप्रकारकतदाश्र
यप्रसक्तेपि परंपरासंबंधेन तत्प्रकारकज्ञानमेव प्रत्यासत्तिरतो घटत्वादिसामान्यलक्षणायाः कार्यदिशि न दर्संग्रहोपनदोषायेतिमहाचा
र्यानुयायिनः संप्रदायविदस्तु स्वरूपेतो घटत्वादिप्रकारनिखिलघटताद्याश्रयप्रत्यक्षं प्रति घटत्वादिसामान्यलक्षणायाय्योत्कर्षरूपेणो वकार्य
कारणाभावः जातित्वादिरूपेणाघटत्वादिप्रकारकनिखिलघटत्वाद्याश्रयप्रत्यक्षं प्रति तज्जातित्वादिरूपेणा यत्किंचिज्जातित्वादिरूपेणाप्रकारकज्ञानमेव

म०म० हेतुःकिंपरंपरासंबंधेनज्ञातित्वादिघटकध्वंसत्वाप्रकारकज्ञानकल्पनपापकलीम्र्तसाक्षात्कारस्यद्विविधविषयकत्वकल्पनयावाज्ञानलक्षणायाः
कार्यतावच्छेदकंतुसप्रमाणतःसंसर्गावच्छिन्नघटत्वादिविषयिताशालिज्ञानत्वं घटत्वादिप्रकारकज्ञानादिव द्रव्यत्वादिविशेष्यकज्ञानादपिघ
टत्वादिप्रकारकोपनीतभानोदयात् विनश्यद्वस्यालौकिकसंनिकर्षाजन्यघटत्वादिनिर्विकल्पकानंतरमपिघटत्वादिप्रकारकस्यप्रसक्ति
वारणायसंसर्गावच्छिन्नेतिविषयिताविशेषणं केचित्तु ज्ञानलक्षणायाःसप्रकारकंघटत्वादिज्ञानत्वंकारणतावच्छेदकं नचैवं विनश्य
द्वस्यलौकिकसंनिकर्षजन्यद्रव्यत्वादिविशिष्टवत्त्वात्मकघटघटत्वादिनिर्विकल्पकादपिघटत्वादिप्रत्यक्षापत्तिरितिवाच्यं इष्टत्वात् सर्वांश
निर्विकल्पकस्यैवप्रमासमित्वानभ्युपगमेइत्याहुःतदसत् तथासतिसर्वांशनिर्विकल्पकादपिइष्टापत्तेःसुकरतयासप्रकारकत्वोपादान
स्यापिकारणतावच्छेदकेअर्थतापत्तेःसविशेष्यकत्वसांसर्गिकविषयताशालित्वमादायविनिगमनाविरहेणकार्यकारणभावद्वयापत्तेश्च ज्ञा
नलक्षणायाःकार्यतावच्छेदकंचघटत्वादिप्रकारकप्रत्यक्षत्वंघटत्वादिज्ञानंविनापिजायमानसामान्यलक्षणाजन्यघटत्वादिमुख्यविशेष्यकप्रत्य
क्षेव्यभिचारवारणायविषयित्वमपहायप्रकारिताप्रवेशःप्रकारिताचालौकिकीग्राह्या तेननिर्विकल्पकजन्यप्राथमिकतद्विशिष्टलौकिकप्रत्य राम०
क्षेनव्यभिचारः नचैवंयत्रज्ञानलक्षणासंनिकर्षोलौकिकसंनिकर्षश्चद्वयमेववर्त्ततेतत्रकीदृक्ज्ञानंस्यादितिवाच्यं तत्रलौकिकालौकिकोभयप्रकारिता

कस्यैवप्रमस्यस्यैवोत्पन्ने विषयितायाः सांकार्यस्यादोषत्वात् नचतत्प्रकारकादिज्ञानं विनापिजायमाने योगजधर्मजन्यतत्प्रकारकप्रमत्स्येव्यभिचा
र इतिवाच्यं योगजधर्मजन्यतावच्छेदकतत्तद्व्यक्तित्वावच्छिन्नान्यत्वेन विशेषणात् न चैवं तत्प्रकारकप्रमात्मप्रत्यक्षज्ञानस्य हेतुतयाशुक्तिज्ञानं वि
नापितादृशभ्रमापत्तिरितिवाच्यं इदंरजतमितिशुक्तिमुख्यविशेष्यकमानसभ्रमस्यापि शुक्तिज्ञानात्मककद्रव्यशुक्तिविशिष्टधीकारत्वात्सत्वेनत्रकुत्र
विद्धर्मिताशुक्तिप्रकारकत्वनियमात् शुक्तिज्ञाने रजतत्वस्य तेशुक्तिप्रकारकज्ञानसामान्यकारणाविरहाद्देव तदभावात् विशेषसामग्रीसहितायाएव सा
मान्यसामग्र्याः फलोपधायकत्वात् नचेदंरजतमितिशुक्तिमुख्यविशेष्यकमानसभ्रमस्य न शुक्तिप्रकारकत्वनियमः शुक्तिप्रकारकज्ञानप्रतिबंधक
दोषसत्वे तत्रतस्याप्रकारत्वादितिवाच्यं शुक्तिमुख्यविशेष्यकतादृशमानसभ्रमस्य तेतादृशदोषमानाभावात् लाघवाद्धयोक्तरूपेण ज्ञानलक्षणा
या कार्यकारणभावकल्पने केवलज्ञानेन तथैवकल्पनात् नचैवं मानसोपनीतभानेऽनुपनीतस्य मुख्यविशेष्यकतयाभाने मानाभावः मुख्यविशेष्यत्वस्य का
र्यतानवच्छेदकतयासामग्र्यास्तन्मानसत्वासंभवादितिवाच्यं मुख्यविशेष्यत्वस्य कार्यतानवच्छेदकतयासामग्र्यारणानियम्यतयाबाधकसत्वए
व मुख्यविशेष्यतयाभानावश्यकत्वात् नचैवं मानसोपनीतभानवद्वहिरिंद्रियोपनीतभानेप्यनुपनीतस्य प्रकारत्वं मुख्यविशेष्यत्वलक्षणाद्विविष
ति यत्वापत्तिरितिवाच्यं सामान्यलक्षणालौकिकसंनिकर्षाजन्यातिरिक्तस्य बहिरिंद्रियजन्यस्य तन्मुख्यविशेष्यकप्रमत्वस्यानुभवसिद्धत्वेनास्वीकृततयाद्विवि

मू० म०

शेषसामग्र्या बाधादेव तद्बाधात् मानसस्य तु तदतिरिक्तस्यापि इदं रजतमित्याद्युपनीतभानविशेष्यकज्ञानस्योपनीतस्मृत्यादिमुख्यविशेष्यकत्व
मनुभवसिद्धमतो नालिंगकत्वं न च तथापि घटघटत्वादिनिर्विकल्पकोत्तरं जायमानेऽयंघट इत्यादिविशिष्टप्रत्यक्षे घटत्वादेर्मुख्यविशेष्यत्वा
पत्तिः लौकिकसंनिकर्षरूपविशेषसामग्रीसत्त्वादिति वाच्यं तत्राप्यसति बाधके घटांशे घटत्वादेर्मुख्यविशेष्यत्वेपीष्टत्वादिति केचित्तु
संसर्गावच्छिन्नतद्विषयिताशालिज्ञानत्वेन कारणता योगजधर्मसामान्यप्रत्यासत्तिजन्यतद्विषयकप्रत्यक्षत्वेन कार्यता तद्विषयता च लौकिक्या
ह्या तेन लौकिकप्रत्यक्षेण व्यभिचारः तथा च तद्विषयप्रत्यक्षमात्रस्य कार्यतावच्छेदकतया इदं रजतमिति शुक्तिमुख्यविशेष्यकमानसस्य मो
पि न शुक्तिज्ञानं विना बहिरिंद्रियजोपनीतभानोपनीतस्य मुख्यविशेष्यत्वानिरासप्रयोजकं क्रमेरोत्साकुरीति संक्षेपः विस्तरस्तु अस्मत्कृतसिद्धान्तरहस्ये
ऽवधेयः ननु महानसादौ वह्निधूमव्याप्तिप्रत्यक्षदशायां महानसीयधूमादिनिष्ठलौकिकसान्निकर्षादेव पर्वतीयधूमांशे पि लौकिकसाक्षात्कारात्मको व्या
प्तिग्रहः स्यात् किं सामान्यलक्षणया प्रत्यासत्त्या नेत्यत आह तद्विशेष्यकेत्यस्य इति तद्वौलौकिकप्रत्यक्षेऽसमर्थः तदिंद्रियसन्निकर्षस्येति तन्नि
ष्ठलौकिकसंनिकर्षस्येत्यर्थः अनागतादावित्यत्र अनागतादित्वेपर्वतीयधूमस्य असमर्थ आदिपदात् व्यवहितातीतपरिग्रहः संयोगादेर्महानसीयधूमादि
निष्ठचक्षुःसंयोगादेः आदिपदात् संयुक्तसमवायादेः परिग्रहः अभावात् लौकिकप्रत्यक्षजनकत्वासंभवात् तथा च लौकिकसन्निकर्षस्य विषयघटितत्वा राम०

नाधिकरणपप्तताहेतुतयाऽप्रसिद्धेर्लौकिकसंनिकर्षतोनपर्वतीयधूमलौकिकप्रत्यक्षसंभवइतिभाव इतिवदंतीति इतिनैयायिकावदंतीत्यर्थः तत्
नैयायिकवर्च्चनं श्रुद्धरेमीमांसकाः नमन्यंते प्रमाणत्वेननमन्यंते तथा हीति तेझीत्यर्थः धूमत्वावत्वावच्छिन्नसामानाधिकरण्यसंबंधेनधूमत्व
विशिष्टाधूमनिष्ठेत्तिपावत व्याप्तिः वन्हिव्याप्ति धूमादिष्ववह्निव्याप्तिसंनिकृष्टधूमेप्रत्यक्षाभ्युपगमेऽन्यथाख्यात्यापत्तिरतसंबंधावच्छेदाप
धूमनिष्ठेस्फुरंसंनिकृष्टधूमविषयोऽस्तिसंनिकृष्टरूपएवविशेष्येत्यर्थं धूमत्वेन धूमत्वप्रकारेणाततत्वदनंतरं स्मृतासेतिधूमत्वरूपेणासं
निकृष्टधूमएवस्मृतासेत्यर्थः ततीयलिंगपरामर्शेति पक्षविशेष्यकव्याप्तिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेत्यर्थः तस्यसंनिकृष्टधूमविशे
ष्यकव्याप्तिप्रत्यक्षापेक्षयाततोप्यत्वात् पक्षनिष्ठधूमवृत्तितयाऽज्ञायतइतिलौकिकसंनिकर्षमर्यादयाप्रत्यक्षं विशेषणत्वेनभासमा
नस्यपक्षनिष्ठधूमस्यविशेषणतयाभासनतइत्यर्थः विशेषणतावच्छेदकांशेसधर्मितावच्छेदककतिशिष्टवैशिष्ट्यबोधं प्रतितद्धर्मितावच्छे
दकप्रकारेणापक्षेविद्धर्मितिविशेषतावच्छेदकप्रकारकनिश्चयस्यैवहेतु ननुतद्धर्मितावच्छेदकप्रकारेणाविशेषणीभूतव्यक्तौविशेषणतावच्छेदक
प्रकारकनिश्चयस्यैवसर्वत्रहेतुर्गौरवादितिभाव यद्यप्येवमापिव्याप्तेःसामानाधिकरण्यरूपतयातस्यचप्रतिव्यक्तिभिन्नयासंनिकृष्टधूमेसाक्षात्का
तव्याप्ते कथंपक्षवृत्तिधूमेभाने तस्याप्तनवगाधितत्वात् अन्यथाख्यातिप्रसंगात्तथापिव्याप्तेःसामानाधिकरण्यरूपत्वेपिसिद्धांतस्मरणोत्तमुक्तमायाम्

मू० म०

तावच्छेदकीभूतधूमत्वादिसंबंधेनैव तत्प्रकारकं ज्ञानमनुमितिहेतुः ननु साक्षात्संबंधेन तथा च महानसीयधूमवत्तिसामानाधिकरण्यस्यापि धूमत्वसं
बंधेनैव पक्षमिद्धूमे सत्त्वात्तत्रवाधस्याभिप्राय लाघवात्साध्यवदन्यावृत्तित्वमेव व्याप्तिः सा च सर्वधूमेष्वसंभव इत्यत आह तदनभ्युपगमे
पीति उक्तरूपेणाप्रत्यक्षतो विशिष्टपरामर्शानभ्युपगमेपीत्यर्थः तथैव धूमत्वरूपेणासन्निकृष्टधूमस्यैव प्रवृत्तिधूमज्ञानात्पक्षविशेष्यकधू
मज्ञानान्नव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानस्यैवानुमितिहेतुत्वात्कथं तादृशज्ञानद्वयादनुमितिरिति तत्राह व्याप्त्यनुभवेति व्याप्त्यनुभवत
त्स्मरणानुभवसाधारणव्याप्तिज्ञानस्य मामेत्यर्थः यथाश्रुते स्मृतिजनकीभूतस्य व्याप्त्यनुभवस्यापृथक्कृत्य हेतुतया पृथक्कृत्य उत्कीर्त्तनानौचि
त्यात् इति ध्येयं एकप्रकारकत्वेनेति यद्धर्मावच्छिन्नविशेष्यकताव्याप्तिज्ञानं तद्धर्मप्रकारेण हेतोः पक्षधर्मताज्ञानस्यैवानुमितिहेतुत्वादित्य
र्थः ननु नियमतो विशिष्टवैशिष्ट्यावगाहिज्ञानमेव कारणमिति भाव तनु सामान्यलक्षणायाः प्रत्यासत्तित्वानभ्युपगमे गोत्वरूपेणासंनि
कृष्टगोव्यक्तिं यत्र पित्वाव्यवहारविषयत्वेन हेतुनाशक्तिसंबंधेन गोपदवत्तासाधने व्यक्त्यंतरेषु संनिकर्षाभावेन परामर्शाभावादनु
मित्यनुत्पादाद्गोपदवत्त्वग्रहणानंतरं व्यक्त्यंतरान्वयबोधो न स्यात्तच्च शक्तिसंबंधेन गोपदवत्त्वाज्ञानाभावात् नच परामर्शानुमित्योः समानप्रकार राम
कत्वेनैव कार्यकारणभावाद्गोत्वरूपेणासंनिकृष्टगोव्यक्तिविशेष्यकपरामर्शादेव व्यक्त्यंतरेष्वप्यनुमितिर्वाच्यं तथा सति द्रव्यत्वरूपेणाप
ऽ+ साधारणैकैकव्यक्तिप्रायोवानुमीमांसकैरुपनीतमानानभ्युपगमादुक्तरूपेणातत्र ये प्रत्यक्षतो विशिष्टपरामर्ऽ

र्तेन क्रियाप्यवक्तृज्ञानाजन्येपि वन्ह्यनुमित्यापत्त्याश्च मयाख्यातापत्ते किंच सामान्यलक्षणाया अस्याः सत्तित्वानभ्युपगमे यस्यकुत्रसुस्मा
नुमानादिना गोत्वत्वरूपेणास्मरणं गवानुभवत्वरूपसंस्कारो पदप्रवणानंतरं द्वीपान्तरगत्वा देरन्यपबोधो न स्यात् तद्बोधे संस्काराभावेनागोपदास्य
स्यस्मरणासंभवात् सामान्यलक्षणाभ्युपगमे तु संनिकृष्टगोव्यक्तिषु द्वितीयादिविशिष्टप्रत्यक्षदशायामेव गोत्वसामान्यलक्षणाप्रत्यासत्त्यास
कलगवानुभवेन सकलगोचरसंस्कारसंभवे इष्टं तत्रापि गवादिपदेषु चापि द्विपदेद्वारतो द्वयर्थासमर्थ जायमानानामिति विशेष शक्त्यनुभवे विशक्तिज्ञा
नेऽसमर्थ तस्मादगोत्वि तस्मात्स्मरणामितिचेत्समतज्जन्यपदार्थस्मरणोऽसमर्थः पथाश्च । तेशक्त्यनुभवशक्तिस्मरणयोः कार्यहेतुतयाप्यसाकतद्वत्कीर्ण
नस्यासंगतत्वापत्तेः स्मरणानुभवयोरपि समानप्रकाशत्वाभ्युपगमे तु तादृशशक्तिवाद विरोधः तदनभ्युपगमे चान्यथा -- स्यात्पत्ता गोत्वावच्छि
न्नविशेष्यकशक्तिज्ञानस्यैवासंभवात् कथं तादृशशक्तिज्ञानस्य हेतुत्वाभ्युपगमस्तस्मात्तु भयथैवासंगतत्वापत्तेः न चापरने योपि जातो व्यक्तोध शक्तिः
परंतु गोत्वजातिप्रकारेण व्यक्तौ विशेष्यकशक्तिविशिष्टशक्तिज्ञानादेव अनंतरस्यापि स्मरणादनुभवश्चेद्भवेत् तिशक्तिवादार्थइतिवाच्यं लाघवाद्गवादिपदस्य
गोत्वादिजातावेव निरवच्छिन्नशक्तिःशक्तिसंबंधेन स्वरूपतो गोत्वादिविशेष्यकज्ञानमेव गोत्वादिजातिप्रकारकव्यक्तिस्मरणे तादृशव्यक्त्यनुभवे च हेतुरस्त्येव
जातिशक्तिवादार्थत्वे शब्दपरिच्छेदे विधानादिति चेत्तु न पदानुपस्थितस्यार्थस्य शाब्दबोधविषयत्वाभावमितिनियमादस्य चायुक्तेः कथं शाब्दबोधमानमपि

मु० म०

मतआहतत्रेति गवादिपदजन्यशाब्दबोधइत्यर्थः पिग्पतादिवदिति आदिपदाज्जातपर्यपदस्यिह अप्रर्थव्यक्तिरितिपदद्वयार्थानुपस्थितायाश्चपिव्यक्ते
र्भानमित्यर्थ अनुमानेत्विति स्वार्थे यथाव्यापकतावच्छेदकत्वेनागृहीतधर्मस्यनानुमितिविधेयतावच्छेदकत्वमितिनियमंपरिष्कृत्य बाधसहका
राव्याप्यकात्वेनावच्छेदकत्वेनागृहीतधर्मस्याप्यनुमितौ विधेयतावच्छेदकत्वं तथेहापि पद्यो तु नियमं परिष्कृत्य वदानुपस्थितस्यापि शाब्दबोधवि
षयत्वमित्यर्थः ननु महानसादौ वह्निधूमव्याप्तिग्रहदशायां सर्वाधूमो वह्निआरककत्वेनेति गवादिपदस्य जातावेकशक्तस्तथा गोपदविशेष्य
कशक्तिसंसर्गकगोत्वप्रकारकगोविशेष्यकसमवायसंसर्गकसमवायसंसर्गकस्मरणोहेतुसमवायसंसर्गकगोत्वप्रकारकस्मरणासमवायसंस
र्गकागोत्वप्रकारकशाब्दबोधे हेतुर्व्यतिक्रमे ता हेतुहेतुमद्भाव ननुगोत्वप्रकारकस घटत्वविशेष्यकगोपदशक्तितानं गोत्वप्रकारकतद्घटविशेष्य
कस्मरणाहेतुर्गोत्वप्रकारकतद्घटविशेष्यकस्मरणागोत्वप्रकारकतद्घटविशेष्यकशाब्दबोधे हेतुरितिसमानविशेष्यकत्वसमानप्रकारकत्वो
भयांतर्भावेनकार्यकारणभावेत्यर्थ तथाचव्यक्त्यंतरेगोपदशक्त्यनुमित्यभावे विगोपदविशेष्यकगोत्वशक्तिज्ञानादैवसंनिकृष्टव्यक्तिवत्स्यात्तो
तस्यापि शाब्दबोधः एवंद्वीपांतरेपिगवादेः संस्काराभावेनस्मरणासंभवे विगोत्वप्रकारेणासंसर्गकृष्टव्यक्तिनांस्मरणादेवद्वीपांतरीयगवादीनाम राम०
पिशाब्दबोधइतिभाव स्मरणैर्वेकस्पतइति इत्यत्रविनिगमकमस्त्वेवादेवस्पतइत्यर्थः लाघवात्समानप्रकारकत्वस्यावश्यकत्वाद्वेतिभावः इदमुप

लक्षणां गवादिपदस्य गोत्वादिजातावेव लक्षणतया युक्तौ शक्तिविरहेण शक्तिज्ञानस्य समानविशेष्यकत्वेन हेतुत्वासंभवाच्च केचित्तु एकप्रकारकत्वेन
हेतुहेतुमद्भाव इत्यस्य गोत्वावच्छिन्नविशेष्यकशक्तिज्ञानं गोत्वप्रकारकगोविशेष्यकसमवायसंसर्गकस्मरणे हेतु समवायसंसर्गकगोत्वप्र-
कारकस्मरणसमवायसंसर्गकगोत्वप्रकारकगोविशेष्यकशाब्दबोधे हेतुरिति क्रमेण हेतुमद्भावो न तु पद्योक्तक्रमेण समानविशेष्यकत्वस्यान्य-
तर्भावइत्यर्थ इत्याहुः तदसत् एवं येऽपक्तौ स्मरणस्य संभवो न मते अतः सर्वधूमभावनार्थं अवश्यं धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वं स्वीकरणी-
यमित्यत आह धूम इति सर्वभानार्थं सर्वधूमभानार्थं तत्र तत्स्वीकारः धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वस्वीकार धूमत्वसामान्यलक्ष-
णायाः प्रत्यासत्तित्वेमानमाशंकते वह्निमानितीति विशेषणतानसाध्या पर्वतीयवह्निज्ञानसाध्या पद्या अतेय साध्यतावच्छेदकत्तानजन्मतया
सिद्धसाधनापत्तेः साध्यत्वं चाव्यवहितोत्तरवर्जितत्वं तेन तादृशकार्यत्वावच्छिन्नं प्रतिस्वरूपयोग्यत्वमादायनार्थांतरं पर्वतीयवह्निज्ञानतावच्छिन्न-
कारणत्वस्य साध्यत्वे प्रसिद्ध्याप्तेः पर्वतीयवह्निलिंगकानुमितित्वस्य पर्वतीयवह्निविषयत्वादिज्ञानत्वेन ज्ञातेनैव वा हेतुत्वादिति ध्येयं विशिष्टज्ञा-
नत्वात् पर्वतीयवह्निविशिष्टज्ञानत्वात् पर्वतीयवह्नित इदमनुमितिरिष्टं तत्तर्कस्य नइति वह्नित्वज्ञानस्य सामान्यानसामान्यतसामान्यलक्षणत्वेन प्रत्या-
सत्तित्वकनेसर्थ तथा धूमत्वज्ञानस्य प्रत्यासत्तित्वं न हेतुतया विसामान्यलक्षणात्वं न प्रत्यासत्तितावच्छेदकं सामान्याश्रयत्वस्य केवलान्वयितया इदमस्य

मू० म० सामान्यज्ञाने जगत एव वन्हित्वलक्षणापत्तेः तथा च वन्हित्वसामान्यलक्षणाया प्रत्यासत्तित्वसिद्धावपि धूमत्वसामान्यलक्षणायाः प्रत्यासत्तित्वे मानाभाव
इत्यस्वरसादाह कृचिदिति व्यापकत्वात्साध्यत्वात् तथा च पर्वतो धूमवानित्यसंनिकृष्टधूमसाध्यकानुमितिंते विशेषणज्ञानजन्यत्वानुरोधेन धूमत्वसामा
न्यलक्षणायाः प्रत्यासत्तित्वमावश्यकमिति भावः विशिष्टवैशि[redacted]स्येति[redacted] वन्हित्वधूमत्वविशि
ष्टवैशिष्ट्यज्ञाने वन्हित्वधूमत्वप्रकारकज्ञानस्यैवेत्यर्थः विशेषणज्ञानमपि पर्वतीयवन्हिमत्पर्वतीयधूमज्ञानमपि तथा पर्वतीयवन्हिपर्द्धय
धूमविशिष्टबुद्धौ हेतुः गौरवादिति तथा चोक्तानुमानमप्रयोजकमिति भावः अनुगौरवात् पर्वतो वन्हिमानितेः पर्वतीयवन्हिज्ञानजन्यत्वाभ्युपगमे गौ
रवमिति विशिष्टप्रत्यक्षे विशेषणज्ञानस्य हेतुत्वापत्तिस्तथा चनापाते निर्विकल्पकेनेत्यत्रेष्टापत्तिमाह गौरवमितीति मानाभावात् मध्ये निर्विकल्पके
मानाभावात् स्पष्टविलंबस्य च य च निर्दोषत्वादिति भावः पूर्वोक्तगौरवमङ्गीकृत्यैव तटस्थः शंकते विशिष्टज्ञानत्वमेवेति गोत्वविशिष्टज्ञानत्वावमवेत्स
र्थमानं निर्विकल्पके मानां गौरवमिति प्राथमिकविशिष्टधीगोत्वज्ञानत्वावच्छिन्नकारणताप्रतियोगिनी गोत्वविशिष्टज्ञानत्वादित्यनुमानात्प्राथ
मिकविशिष्टज्ञानात्पूर्वं गोत्वज्ञानं सिद्ध्यत् पक्षधर्मतावलान्निर्विकल्पकं स्वरूपमेव सिद्ध्यतीति तत्पूर्वमपि विशेषणज्ञानाभावेन विशिष्टबुद्ध्यात्मकत्वस्य तस्या राम०
संभवादिति भावः दृष्टान्ताभावादिति द्वितीयविशिष्टज्ञानेपि त– नस्य हेतुत्वासिद्धेः गोत्वलिंगगोत्वसाध्यकानुमितावपि गोत्वविषयकव्याप्तिज्ञानेन

ज्ञानत्वेनैव चाकारणतया तत्त्ववृत्तिपगोत्वज्ञानत्वस्य हेतुत्वासिद्धेश्च तथा च साध्याप्रसिद्धिरिति भावः ननु यद्विशिष्टज्ञानं तत्तज्ज्ञानत्वावच्छिन्नकारणताम
तियोगीव ते सोऽसम्भवतो व्याप्यसाध्यदंडी पुरुष इति ज्ञानं दृष्टांतस्यात् अत आह दंडी पुरुष इति विशेषणधीति दंडत्वादिज्ञानत्वेन कारणत्वानभ्युपगमादित्यर्थ
विशिष्टवैशिष्ट्येति दंडत्वाविशिष्टवैशिष्ट्यज्ञानत्वादिरित्यर्थः न च गोत्वज्ञानाव्यवहितोत्तरवर्त्तित्वमेव साध्यं तथा च गोत्वसाध्याकानुमितिरेव दृष्टांतर
तिवाच्यं तथाप्यप्रयोजकत्वात् गोत्वविशिष्टबुद्धौ गोत्वज्ञानत्वेन हेतुत्वस्य गौरवेणामानाभावेन चासिद्धत्वादिति भावः सामान्यलक्षणायाः प्रत्यासत्ति
त्वे साधकाभावमुक्त्वा बाधकमप्याह अपि चेति प्रमेयत्वेनेति संयोगादिसंबंधेन प्रमेयहेतुकं पर्वतकपिसंयोगाभाववान् प्रमेयत्वादित्यादौ महा
नसादिषु सन्निकृष्टप्रमेये प्रमेयत्वरूपेणाभिमतिस्पृष्टदशायां प्रमेयत्वसामान्यलक्षणाप्रत्यासत्त्या पक्षवृत्तिप्रमेये व्याप्तिग्रहानन्तरं पुरुष इ
त्यर्थ सर्वज्ञः स्यादिति स्ववृत्तिसकलधर्मप्रकारेण सर्वेषां पदार्थानां ज्ञानवान्स्यादित्यर्थः प्रमेयत्वसामान्यलक्षणाप्रत्यासत्त्या पक्षवृत्तिप्रमेये व्याप्ति
ग्रहस्य दशायां तया प्रत्यासत्त्या प्रमेयमात्रस्यैव ज्ञानात् तदनंतरं प्रमेयं प्रमेयवदित्याकारकसकलपदार्थविशेष्यकस्वस्ववृत्तिसकलधर्मप्रकारको
पनीतभानेबोधकाभावादिति भावः नन्वस्तु सर्वज्ञत्वं किं नः छिन्नमित्यत आह तथा चेति परकीयज्ञानविषये विशिष्य स्वज्ञानविषये स्वस्य स्वरूपानोघ
टत्वप्रकारकदंडत्वधर्मितावच्छेदकज्ञानविषय इति यावत् तस्य पुरुषस्य तदनंतरमिति घटत्वतदभावयोरन्यतरनिश्चयादित्यर्थः एतच्च समानवि

मू॰ म॰

षयकनिर्णयमात्रस्यैव विरोधित्वमित्यभिमानेनैवोक्तं प्रमेयत्वेनेति तद्ज्ञानेनेति घटत्वाद्यज्ञानेनेत्यर्थः॥ ॥इति सामान्यलक्षणापूर्वपक्षरहस्यं पदीति
सामान्यलक्षणा सामान्यलक्षणा याः प्रत्यासत्तिता अनुकूलतर्कादिकं विनेति व्यभिचारज्ञानप्रतिबंधकतर्काद्यभावदशायामित्यर्थः व्यभिचारसं
शयः धूमो वह्निव्यभिचारी न वेत्याद्यभिचारसंशयः प्रसिद्धधूमे सकललौकिकसंनिकृष्टधूमे वह्निसंबंधज्ञानात् वह्निव्याप्यत्वनिश्चयात् मानाभा
वेन सान्निकर्षाभावेन अज्ञानादिति संशये विशेष्यतयानादिस्यर्थः परं न चेन अन्यैपाथिकनये च धर्मिज्ञानस्य संशयाहेतुत्वेपि संशयस्य धर्म्मि
शप्रत्यक्षरूपतया धर्मीन्द्रियसन्निकर्षस्यावश्यं हेतुत्वादिति भावः सामान्येन तु धूमत्वसामान्यलक्षणासंनिकर्षेण तु सकलधूमोपस्थि
तौ सकलधूमप्रत्यक्षस्वीकारे धूमांतरे कालांतरीयदेशांतरीयधूमे विशेष्यदर्शनेन व्याप्यत्वनिश्चयेन एतत्संशयापातः प्रसिद्धधूमे धूमत्वेन व्या
प्तिनिश्चयः तत्तद्धूमत्वेन वा अयं सामान्यलक्षणास्वीकारेपि संशयोपपत्तिः सिद्धत्वसामान्यधर्मितावच्छेदकभिन्नधर्म्मिनिश्चयस्यापि प्रतिबंधकत्वात् वि
तीयधूमे धूमत्वप्रकारेणार्थ एव संशयः स्यात् समानप्रकारकनिश्चयस्यैव निश्चयविरोधित्वात् नचमानसंशयस्यामयानुपपत्तिः सामान्यलक्षणा
याः प्रत्यासत्तित्वस्वीकारस्य यापि च किंचिद्धूमादौ धूमत्वादिप्रकारकज्ञानानंतरं धूमत्वप्रकारेण सकलधूमविषयकप्रत्यक्षमनुभवसिद्धमिति हेतुराद्या राम॰
दृश्यसामान्यलक्षणास्वीकरणीयेतिवाच्यं तादृशानुभवस्यैवासिद्धेः तादृशानुभवस्य सामान्यलक्षणाकृतत्वे विवादस्यैव पर्यवसानादिति संक्षेपः विस्तरस्त्वस्मत्कृत

सिद्धांतरहस्येनुसंधेयः लीलावतीकारमतमाशंकते यत्त्विति सामान्यलक्षणाया अप्रमाणत्वादनभ्युपगमेति शेष याकारो चिकीर्षेति या
कादिविशेष्यकवर्तमानत्वसाध्यत्वप्रकारकेच्छेत्यर्थः सुखादाविच्छेति सुखादिविशेष्यकसुखत्वादिप्रकारकेच्छेत्यर्थः इच्छाविरहात् इच्छे
ता इत्यकाभावात् असिद्धस्याज्ञानादिति तद्विषयकेच्छायां तद्विषयकज्ञानस्य हेतुत्वाच्च ज्ञानं विनाइच्छाया असंभवादिति भावः सुखत्वादिना सुख
त्वादिज्ञानरूपसामान्यलक्षणाया अत्र इच्छाप्रवृत्तिस्वाभाव्यादिति इच्छाप्रवृत्तित्वावच्छिन्नं प्रति सामान्यतो ज्ञानत्वेनैव कारणत्वादित्यर्थः अति प्र
संग घटत्वप्रकारकघटज्ञानात् पटत्वप्रकारकेच्छाप्रवृत्तिप्रसंग इत्यार्थं समानानप्रकारकत्वेन समानप्रकारकत्वसंबंधेन ननु समानप्रकारक
त्वसंबंध सामान्यविशेष्यकत्वे चेत्यत्र विनिगमकाभावेन द्वयोरेव संबंधत्वात् सिद्धस्याज्ञानेकथमसिद्धेच्छेत्यत आह नन्वसमानविषयकत्वेनापीति
ननु समानविशेषत्वसंबंधेनापीत्यर्थः नन्वन्यत्राकल्पनेपि सुखत्वादिप्रकारकसुखादिप्रकारकसुखादिज्ञानात्सुखत्वादिप्रकारकसुखादीच्छेत्य
तिस्थले एव विनिगमकाभावात्तस्य संबंधत्वं कल्पनीयमित्यत आह समानविषयत्वापीति इच्छाकृत्योरभावादिति गुणत्वादिप्रकारकसुखादिज्ञानात्सु
खत्वादिप्रकारकसुखादिगोचरेच्छाकृत्योरभावादित्यर्थः न च घटत्वप्रकारकप्रत्यक्षविशिष्टज्ञानाद्घटत्वप्रकारेणाघटांतरेच्छोत्पादवारणाय समानविशे
ष्यकत्वमप्यावश्यकमिति वाच्यं प्रकृतेवतत्साम्योक्तत्वात् तच्च तथापि पाकत्वप्रकारकासिद्धपाकज्ञानात् कथमसिद्धपाके चिकीर्षावर्तमानत्वसाध्यत्वस्या

म०म० द्ध्याकेवाधितत्वेनाप्रमात्वाभावात्तत्रतत्प्रकारकत्वानासंभवात्सिद्धपाकेसन्निकर्षाभावेनतत्प्रकारकज्ञानासंभवादितिवाच्यंपाकादौवर्तमानत्व
कृतिसाध्यताप्रकारकज्ञानंहिनेंद्रियेणातस्यातींद्रियत्वात् किंत्वनुमानेन तथाचपाकत्वप्रकारकसिद्धपाकज्ञानादेवपाकत्वप्रकारेणसिद्धपा
केयथाकथंचित्सिद्धस्यवर्तमानत्वकृतिसाध्यत्वस्यानुमानं पक्षतानानुमित्योरपिसमानप्रकारकत्वेनैवसंभवात् नचसंवर्तमानमत्कृतिव्यति
रेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिरूपस्यवर्तमानत्वकृतिसाध्यत्वानुमापकलिंगस्यसिद्धपाकेवाधादप्रसिद्धपाकेचविनाशाभावान्मत्वसूरणांज्ञातुम
शक्यत्वात् परामर्शासंभवेनकथमनुमितिरितिवाच्यं स्वाश्रयवृत्तिपाकत्वात्मकपरंपरासंबंधेनपाकत्वप्रकारेणासिद्धपाकएवतादृशलिंगवत्ता
परामर्शसंभवात् परामर्शानुमित्योरपिसमानविशेष्यतावच्छेदकत्वेनैवकार्यकारणभावात् येनसंबंधेनव्याप्यताग्रहस्तेनैवसंबंधेनहेतुमत्ता
ज्ञानमनुमितिहेतुरितिनियमःपरेषामसिद्धःकिंतुयेनसंबंधेनव्याप्यताग्रहस्तेनैवसंबंधेनहेतुमत्ताज्ञानमिवयेनसंबंधेनव्याप्यताग्रहस्तेनसंबंधेनप
त्वाधिकरणांतद्वृत्तिपक्षतावच्छेदकसंबंधेनहेतुमत्ताज्ञानमप्यनुमितिहेतु स्वपदंहेतुपरं नचैवंसंयोगादिसंबंधेनवह्निव्याप्यतयागृहीतस्यधू
मादेःस्वाश्रयवृत्तित्वसंबंधेनद्रव्यत्वरूपेणावगाहिपरामर्शात् तादृशधूमादेःसंयोगसंबंधेनद्रव्यत्वरूपेणपर्वतेपरामर्शाच्च द्रव्यत्वरूपेणावगाह राम०
देवह्न्याद्यनुमित्यापत्तावाप्याप्यतिपरामर्शानुमित्योःसमानविशेष्यतावच्छेदकत्वेनैवकार्यकारणताभावादितिवाच्यं व्यापकनयेप्रमासामान्यंप्रति

नकस्यविषयतोस्यपरनयेसाध्यवद्विशिष्टबोधंप्रत्येवजनकतयाऽऽदौवन्ह्याद्यनुमितिमनुत्पादात् अतस्वपरनयेसाध्यतावच्छेदकरूपेणापक्षिंचि
त्साध्यमाक्षिप्तानादेवसाध्यतावच्छेदकरूपेणाप्रसिद्धसाध्यस्यापिभानानाभ्युपगमेनवन्हिव्याप्यधूमवान्पर्वतइतिपरामर्शान्नवन्हित्वरूपेणाप
र्वतेमहानसीयवन्हेर्भानंकार्यकारणभावस्यमतएवज्ञानत्वेनतद्बाधाभाववत्त्वेनमायनयेयत्रतद्वत्त्वमिषद्विशेष्यतासंबंधेनज्ञानोत्प
त्तिस्तत्रविशेषणताविशेषसंबंधेनतद्बाधाभावइतिविशेष्यघटितसामानाधिकरण्यंप्रत्यासत्तिःपरनयेचयत्रयन्निष्ठप्रकारतानिरूपितवि
शेष्यतासंबंधेनज्ञानोत्पत्तित्रविशेषणताविशेषसंबंधेनतद्बाधाभावइतिविशेष्यघटितसामानाधिकरण्यमेवप्रत्यासत्तिर्लाघवात्प्रमानु
पुगमेनव्यभिचारविरहात् नातोविषयाबाधस्यपरनयेविगुणत्वं तद्वत्त्वनिष्ठविशेष्यतासंबंधावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वस्येवप्र
गुणत्वरूपत्वात् नचमायनयेपरनयेवाकथंविषयबाधाभावस्यविषयरूपस्यनिरुक्तविशेष्यघटितसामानाधिकरण्यप्रत्यासत्त्याजनकत्वं
याकरकघटाद्यैश्यामादिभ्रमापांडुपनीतभानानुमित्यादिरूपाणांव्यभिचारादितिवाच्यं विषयबाधस्यहिनिरवच्छिन्नाधारतासंबंधेनाभावोनवि
षयरूपःकिंत्वतिरिक्तःविषयस्यानीतत्वादिदशायामपिविषयवतितत्सत्वात् नचतथापिकेवलान्वयिधर्मप्रमायांविषयबाधस्याप्रसिद्धतयातद
भावस्यजनकतासंभवइतिवाच्यं तत्रतस्याजनकत्वेपिक्षतिविरहात् तदभाववतोऽप्रसिद्धत्वेनापत्तिविरहात् अतएवाविषयाबाधस्यविष

मू० म० यत्र बाधाभाववत्त्वेन न जनकत्वमपि तु सामान्यतोऽभाववत्त्वेन यत्र यद्वन्निष्ठविशेष्यतासंबंधेन यन्निष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन बाधज्ञानोत्प
त्तिः तत्र तद्वन्निष्ठविशेषणतासंबंधेनाभाव इति सामानाधिकरण्यप्रत्यासत्तिः न चाभाववत्त्वमात्रं विशे[redacted]
निगमनादिविरहः भाववत्त्वस्याभावभिन्नत्वादित्यत्र गौरवात् न च संयोगसमवायादिसंबंधेन घटादिप्रमायां द्रव्यत्वगुणत्वादिकमादाय वि
निगमनाविरह इति वाच्यं अतीतानागताधिकरणेषु संयोगादिसंबंधेन घटादिप्रमायां व्यभिचारात् प्रतीतत्वादिदशायां अतीताधिकरणे द्र
व्यादिमत्त्वविरहात् अभाववत्त्वस्य तु तदानीमपि सत्त्वात् न च तथाप्यधिकरणतावच्छेदकतया भिन्नत्वादेरखण्डतिरिक्तपदार्थत्वेन येन कारणत्वे
सेष्टत्वात् धर्मत्रयस्य तु घटानामेव तादृशानां संभवेनानन्तकार्यकारणभावाभावात् वस्तुमात्रपदस्य प्रत्यासत्तित्वं प्रतिज्ञानसामान्यमेव गुणा
तद्वन्निष्ठवृत्तिविषयतासंबंधेन सामानाधिकरण्यप्रत्यासत्तिवस्तुपदादिनाप्यवक्तव्यमात्रविषयकशाब्दबोधे वक्तृत्वादिप्रकारकवस्तुमात्र[redacted]
स्वपरकस्मरणादिरूपस्य पक्षेऽपि विज्ञानस्यानन्तसंसारेव स्वरूपकस्य विसरूपस्य सर्वज्ञसर्वथा विषयतासंबंधेन सत्त्वेनानन्तत्वेऽज्ञानस्यैव तेन संबंधेन स
र्वसर्वदासत्त्वेन च व्यभिचाराभावात् तदेव च लाघवात् प्रत्यक्षेऽपि विशिष्टबुद्धिसामान्यं प्रति हेतुः यत्र यन्निष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन ज्ञानोत्प राम०
त्तिः तत्र तद्वन्निष्ठविशेष्यतासंबंधेन ज्ञानमिति सामानाधिकरण्यप्रत्यासत्तिरभ्युपगमेन तत्र व्यभिचारविरहात् भगवदनभ्युपगन्तोऽपि संस्कार

स्मनोदितनयासर्वद्देवसर्वज्ञविशेष्यतासंबंधेनावश्यंकस्यचित्सुखस्यवस्तुपदार्थजन्यवस्तुत्वादिप्रकारकवस्तुमात्रविषयकशाब्दबोधाद्दिस
त्तेनप्रमायामपिव्यभिचारविरहात्तत्रनतुतथापिपरमेसमानप्रकारकत्वेनज्ञानेच्छयोःकार्यकारणभावेसुखत्वादिप्रकारकसिद्धसुखत्वाज्ञाना
द्दनुपस्थितसिद्धसुखवाचकविवानुपस्थितेपदार्थांतरोपिसुखत्वादिप्रकारकेच्छोमस्तिःनचपदार्थांतरेसुखत्वाद्यसंसर्गग्रहासत्वान्नैवेच्छे
तिवाच्यंउपस्थितेऽसंसर्गाग्रहस्यतुतरांसत्वात्नचैतत्प्रकारकज्ञानत्वेनतत्प्रकारकतदाश्रयविषयकेच्छात्वेनकार्यकारणभावोनतुसमानप्रका
रकत्वेनप्रमासतिविशेष्येरजतत्वादिप्रकारकज्ञानात्प्रथमसंतेशुक्त्याहैरजतत्वादिप्रकारकेच्छानुपपत्तेनचपुरस्थतत्रैवाप्तिरितिवाच्यंशुक्तौ
रजतार्थिप्रवृत्तिरनुरोधेनतेनापितत्स्वीकारात्तस्मादुपस्थितेष्टभेदाग्रहादिच्छेतिपरेणाभ्युपेयंअतएवेदंत्वादिनोपस्थितेशुक्त्याहैरजततत्वेने
च्छातथाचभावितिविषयेज्ञातएवेच्छेइतितदर्थमवश्यसामान्यलक्षणास्वीकरणीयेतिचेन्न समानप्रकारकत्वप्रमासमाज्ञानत्वेनेच्छात्वेनसम
वायघटितसमानाधिकरणप्रत्यासत्त्यातत्प्रकारकज्ञानत्वंनतत्प्रकारकेच्छात्वेनैववासामान्यकार्यकारणभावः विशेषतस्तुरजतेईत्वप्रकारकेच्छा
यायांदोषानात्म्रारजतेऽन्यरजतप्रकारकेच्छायांचरूपतेनसमंगृहीतभेदस्मारजतस्यज्ञानंहेतुरितिपरसिद्धांतात् नचातथापिरसिद्धांतोपयाप्तस्व
प्रतमपेक्ष्यलाघवात् तत्तद्विशेष्यकतत्प्रकारकज्ञानस्यतद्विशेष्यकतत्प्रकारकेच्छांप्रतिहेतुत्वमासुखत्वादिरूपेणासिद्धसुखवाचकविच्छानुरोधेनसामान्य

मु० म०१ लक्षणावश्यकमितिवाच्यं स्वमतेपि सुखत्वादिरूपेणासिद्धसुखादावेवेच्छोत्पत्तेः असिद्धरूपेणासिद्धसुखेच्छानुत्पादेपि क्षतिविरहात् एवं चिकीर्षा
पि पाकत्वादिरूपेण वर्त्तमानस्वकृतिसाध्यत्वभ्रमात् सिद्धपाकादावेवोत्पद्यते नासिद्धपाके चिकीर्षाया अयथार्थत्वेपीति क्षतिविरहात् तथाकृत
रूपेणैव विशेषदर्शनसत्वे भ्रमोत्पत्तावपि बाधकाभावाच्च मम सुखं भवत्वात् न तत्र सिद्धत्वज्ञानं विरोधीति वाच्यं तदवच्छेदेन सिद्धत्वज्ञानस्यैव तत्र
कारेच्छां प्रति विरोधित्वात् तत्त्वसुखत्वावच्छेदेन सिद्धत्वज्ञानघटकतेन तत्सत्वे इच्छानुत्पत्तेः केनाप्यनङ्गीकारात् वस्तुतस्तु सामान्यलक्षणां विनापि अयं
काले सुखं स्यादिति कालीनध्वंसप्रतियोगित्वविशिष्टकालत्वादिसाध्यानुमानात् पक्षधर्मताज्ञानबलेनासिद्धसुखादेरसिद्धपाकादेश्च ज्ञानसम्भवः सामान्यलक्ष
णानभ्युपगमे विशिष्टबुद्धिसामान्यं प्रति विशेषणज्ञानस्यापि हेतुत्वानभ्युपगमेन पक्षधर्मताबललभ्यासिद्धसुखादेर्ज्ञानविरहेपि क्षतिविर
हात् ज्ञाते चासिद्धपाके ज्ञानलक्षणाप्रत्यासत्त्यैव तत्तत्स्वमते मनसि वर्त्तमानस्वकृतिसाध्यत्वज्ञानासम्भवेन चिकीर्षासम्भवात् सामान्यलक्षणा आ
प्रत्यासत्तिताभ्युपगमेपि ज्ञानलक्षणायाः प्रत्यासत्तेः प्रत्यासत्तित्वावश्यकत्वादित्यास्तां ॥ नचैवं सामान्यलक्षणायाः प्रत्यासत्तित्वास्वीकारे विशेष
संशयविरोधीति घटो न वेति संशयविरोधी सर्वः समानाकारो हि निश्चयः संशयविरोधी अत एव जातिमानिमादिनिश्चये घटो न वेत्यादिसंशयः राम०
प्रकृते तु घटो न वेति संशयकोटितावच्छेदकघटत्वांशे निश्चयाकारकप्रमेयो न वेति सामान्यलक्षणानभ्युपगमे प्रत्यासत्तिजन्यतथैतिभावस्वसामान्यविरहादिति घट

त्वांशे निर्विकल्पकात्मकं घटत्वविशिष्टज्ञानं प्रति घटत्वांशे निर्विकल्पकात्मकं ज्ञानमेव हेतु अन्यथा जातित्वादिरूपेण घटत्वप्रकारकघटज्ञाने
पि भूतलं घटवदिति घटत्वांशेऽप्रकारकघटप्रकारकघटविशिष्टबुद्ध्यापत्ते जातित्वरूपेण घटत्वज्ञानेप्ययं घट इति विशिष्टबुद्ध्यापत्तेश्च ता
दृशविलक्षणविषयताया भूतलं घटाभाववदिति बाधनिश्चयाभावस्यायं न घट इति भेदग्रहाभावस्य च कार्यतावच्छेदकत्वेन सामग्रीमर्यादा
यैव तद्वच्छिन्नापादनसंभवात् तन्मतदानीं घटत्वांशे जातित्वप्रकारकज्ञानस्यापि सामग्रीसत्त्वात् घट इति घटत्वांशे निष्प्रकारकज्ञानमिति वाच्यं
जातित्वादिप्रकारकज्ञानसामग्र्यास्तादृशविलक्षणविषयताशालिज्ञानं प्रत्यप्रतिबंधकत्वेन तदुपात्तावपि बाधकाभावात् अन्यथा जातिमान् घट इ
ति द्विविधविषयताशालिज्ञानानुपपत्तेः तदानीं जातित्वप्रकारेण ज्ञानसामग्र्या आवश्यकत्वात् एवं च प्रकृते प्रमेयत्वसामान्यलक्षणाजन्यलक्षणाजन्य
घटत्वज्ञानस्य घटत्वांशे प्रमेयत्वप्रकारकत्वनियमाभावतो घट इति सामान्यधीसंभव इति भाव इति दिक् ॥ ॥इति सामान्यलक्षणारहस्यं॥ ॥प्रसं
गत्या उपाधिं निरूपयितुं प्रयोजनं दर्शयन् शिष्यावधानाय प्रतिजानीते उपाधीति तथा च परस्थापनीयायां व्याप्तिनिश्चयप्रतिबंधायोपाधिर्ज्ञाम स
स्थापनायां व्याप्तिनिश्चयाय उपाधिर्निरस्यः स चोपाधिज्ञानं विना न संभवतीति तन्निरूपणमिति भावः कपि तत्र रणास्तु व्याप्त्यनंतरमुपाधिं निरूप
यितुं व्याप्त्या सह एककार्यानुकूलत्वसंगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते उपाधीनादिति यद्यप्युक्तहेतावुपाध्युद्भावने उपाधिज्ञानादिस्म

मू० म०

र्थः तथा च पक्षधर्मीयहेतौ व्याप्तिनिश्चयाद्विजयः तथा परप्रयुक्तहेतावुपाध्युद्भावनेनोपाधिज्ञानाद्विजय इति विजयफलस्य रोधकार्या
नुकूलत्वमेव संगतिरित्याचक्षते प्राहुः तत्र करणीयेति परामर्शविषयत्वं सम्यगर्थः तथा च निरूपपरताविषयीभूत उपाधिरादर्शी धर्मः इत्यन्वयः सा
ध्यताभिमतेति अत्र संमतं तदशानुपादाने वह्निमान् धूमादित्यादौ पर्वतत्वादावतिव्याप्तिरिति तदुपादानं तन्मात्रोपादाने दूषणं त्वाद्यनिग्रहस्थान इ
इति विशेष्यदलं साध्यत्वसाधनत्वे व्यापकत्वव्याप्यत्वे सोपाधौ वस्तुतो न स्त इत्युभयत्राभिमतपदं ननु साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपक
त्वं तच्च साध्ये उपाधिव्याप्तौ गृहीतायामेव तथा स्यात् तथा चानौपाधिकत्वज्ञानादेव व्याप्तिग्रहः अनौपाधिकत्वं च प्रकृते साध्यस्य पावकस्योपाधिव्यापकव्यापक
त्वं उपाधिव्यापकेषु पावकेषु साध्यनिष्ठव्याप्तिनिरूपकत्वं [redacted] र्यवसितं तथा च साध्ये उपाधिव्याप्तौ गृहीतायामेवोपाधौ साध्यनि
ष्ठव्याप्तिनिरूपकत्वज्ञानं उपाधिव्यापकव्यापकत्वं तद्गत उपाधौ साध्यनिष्ठव्याप्तिनिरूपकत्वज्ञाने च साध्ये उपाधिव्याप्तिज्ञानं तस्मादनौपाधिकत्वग्रहे
त्वादन्योन्याश्रय इति न च साध्योपाध्योरन्योन्याभावाघटितत्वगर्भं व्याप्तिज्ञानं प्रसक्तं तत्तदभावघटितत्वगर्भं व्याप्तिघटितानौपाधिकत्वज्ञानं कारणमतो नान्यो
न्याश्रय इति वाच्यं तथा सत्यनवस्थापत्तेः तथा च क्रमशः परस्परसापेक्षत्वादित्यत आह अनौपाधिकत्वेति व्यापकत्वादीत्यादिपदेन व्याप्तिनिरूपणनिरूपकत्वाभा रा०
वरूपसाध्यनाव्यापकत्वपरिग्रहः व्याप्तिनिरूपकत्वापेक्षया लाघवादाह यद्वेति तथा च साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वे सति साधनवन्निष्ठा

संताभावप्रतियोगित्वे सति साधनवन्निष्ठसंताभावप्रतियोगीत्वमुपाधित्वमिति लक्षणं निष्कृष्टं न तेनैवं धूमवान्वह्नेरित्यादौ आर्द्रेंधनादेवव्याप्ति
नत्तादृशाभावाप्रतियोगित्वस्यैवाप्रसिद्धेः न च तादृशप्रतियोगितानवच्छेदकावच्छिन्नधर्मवत्त्वे सतीत्यस्यार्थ इति वाच्यं वह्निमान् धूमादित्यादौ वह्न्यधि
सामग्रींधनादौ तादृशप्रमेयत्वादिवत्त्वेन महानसीयत्वादेश्चातिव्याप्तेरिति चेन्न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदको यः साधनवन्निष्ठाभा
वप्रतियोगितावच्छेदको धर्मस्तद्वत्त्वं तेन रूपेणोपाधित्वमित्युक्तत्वात् एवं प्रतियोगितयोरुपाधितावच्छेदकसंबंधमपि वोध्यं तेन धूमवान्वह्नेरित्या
दौ आर्द्रेंधनत्वादेः समवायादिना धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि न क्षति नचाववह्निमान्धूमादित्यादौ साध्यव्यापकतावच्छेदक
स्य वह्नित्ववह्निसामग्रीत्वादेः समवायेन साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वे प्रतिव्याप्तिरिति वाच्यं नचैवं द्रव्यं सत्त्वादित्यादावव्याप्त
रितिसंयोगाद्यभावव्याप्ति तस्य यथोक्तसाध्यव्यापकत्वविरहादेवं गुणः सत्त्वादित्यादौ संयोगाभावादावतिव्याप्तिः तस्यापि यथोक्तसाधनाव्या
पकत्वादिमत आह प्रतियोगित्वं चेति प्रतियोगितो निष्ठताप्रतियोगितोः साध्यवतः साधनवतोर्विशेषणतां चेत्यर्थः तदधिकरणेति तदधिकरणं प्रति
योगितावच्छेदकस्याधिकरणं प्रतियोगितावच्छेदकावच्छिन्नमिति यावत् तदनधिकरणत्वमित्यर्थः एवमप्रसिद्ध्यादिवारणाय प्रतियोगिपदस्य प्रति
योगितावच्छेदकपरत्वावश्यकतया तच्छेदेन तस्यैव परामर्शात् प्रतियोगितावच्छेदकावच्छिन्नमुपादानात् द्रव्यं सत्त्वादित्यादौ विशिष्टसत्त्वेनाव्याप्ति

मू०म०

नवासत्त्वाभावात्तज्जातेरित्साहेतोर्विशिष्टसत्वेऽतिव्याप्तिरिति भावः वस्तुतस्तु ननु वस्तुमात्रस्यैव वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावस्य साध्यवति
योगित्वस्याप्रसिद्धत्वात्कथं तथात्वं तस्य साध्यव्यापकतारूपत्वमत आह प्रतियोगित्वं चेति तद्वृत्तिष्ठाभावप्रतियोगित्वं चेत्यर्थः तदधिकरणानधिकरण
त्वं तदधिकरणानधिकरणसाध्याधिकरणकं यद्यत्तदन्यत्वं साध्यव्यापकत्वमिति फलितं एवं साधनवन्निष्ठाभावप्रतियोगित्वमपि स्वानधि
करणसाधनाधिकरणकत्वं वक्तव्यं अन्यथा वह्निमान्धूमादित्यादावपि साध्यव्यापकस्य द्रव्यत्वादेर्धूमवन्निष्ठवैशिष्ट्याद्यवच्छिन्नाभावप्र
तियोगित्वादुपाधित्वापत्तेः न चैवं धूमवान्वह्नेरित्यादावयोगोलकभेदादेरुपाधित्वमपाधोरुक्तलक्षणासंभवे व्याईंधनादिरूपे नानाव्यक्त्युपाधावव्या
धि चालनीन्यायेन सर्वासामेवाईंधनव्यक्तीनां स्वानधिकरणाध्याधिकरणकतया साध्यव्यापकत्वविरहादिति वाच्यं स्वावच्छिन्नानधिकरणसा
ध्याधिकरणकं यद्यत्तदन्यत्वे सति स्वावच्छिन्नानधिकरणसाधनाधिकरणको यो धर्मस्तत्त्वं तेन रूपेणोपाधित्वमिति विवक्षितत्वात् प्रथमस्वपद
मत्वप्रतियोगिपरं द्वितीयं चोपाधितावच्छेदकपरमत एव द्रव्यं सत्त्वात् गुणाः सत्त्वादित्यादौ संयोगतदभावयोरपि नाव्याप्तिव्याप्यवकाशः तेवतत्
भावस्तु तदवच्छिन्नाधिकरणानधिकरणत्वमिसन्नंतमदभावपरं तथा चात्र प्रतियोगित्वं न स्वस्वरूपसंबंधविशेषे किंतु तदभावाधिकरणवृत्तित्वं अनेन राम०
द्रव्यं सत्त्वाद्गुणाः सत्त्वादित्यादौ संयोगतदभावयोर्नाव्याप्तिव्याप्त्यवकाश इत्याहुः तदस्मद्धनादृशप्रतियोगित्वं व्यापकतादृशमात्रे विवक्ष्यते साधनाव्यापक

तद्दलमात्रे वा उभयदलएव वा आद्ये साध्यवन्निष्ठाभावाधिकरणवृत्तित्वभिन्नत्वं साध्याव्यापकत्वं फलितं तथा च वह्निमान्धूमादित्यादिसद्धेतावपि साध्य
नाव्यापकघटत्वतादावव्याप्तिः तस्यापि साध्यनिष्ठजलत्वाद्यभावाधिकरणवृत्तितया साध्याव्यापकत्वात् द्वितीये साधनवन्निष्ठाभावाधिकरणवृ
त्तित्वं साधनाव्यापकत्वं फलितं तथा चासंभवः धूमवान् वह्नेरित्यादावयोगोलकादावसत्वादेरपि साधनवन्निष्ठजलत्वाद्यभावाधिकरणवृत्तितया साधना
व्यापकत्वविरहात् अत एव तृतीयोपि न च साध्यवन्निष्ठाभावाधिकरणावृत्तिद्यपर्तेरम्यत्वं साध्याव्यापकत्वंविवक्षितमिति वाच्यं अव्यापकत्वदले प्रतियो
गित्वस्य स्वरूपसंबंधविशेषरूपत्वे द्रव्यं पृथिवीत्वादित्यादौ संयोगादावतिव्याप्ते यदि च साधनाव्यापकत्वमपि साधनवन्निष्ठत्वाभावाधिकरणवृत्ति
त्वं न द्रव्यं सत्वादित्यादौ संयोगादावव्याप्तेः तस्य सत्तावन्निष्ठत्वाभावाधिकरणद्रव्यवृत्तितया साधनाव्यापकत्वविरहात् न च साध्याव्यापकत्वं साध्यव
न्निष्ठाभावाधिकरणवृत्तित्वभिन्नत्वं साधनव्यापकत्वं च साधनवन्निष्ठयावत्किंचिदभावाधिकरणावृत्तित्वं तथा तोन द्रव्यं सत्वादित्यादौ संयोगादावव्या
प्तिः द्रव्यं पृथिवीत्वादित्यादौ संयोगादावतिव्याप्तिरिति वाच्यं तथापि द्रव्यं पृथिवीत्वादित्यादौ तत्संयोगव्यक्तावतिव्याप्तिर्दुर्वारैवेदिकूपघ्यधर्मेति वायुःप्रत
क्षपरत्वविषयताश्रयत्वादित्यादौ पक्षधर्मवहिर्द्रव्यत्वावच्छिन्नप्रत्यसत्वकाव्यापकेऽत - तद्रूपवव्वहेकाकःश्पामोभिव्रात न यत्वादित्यादौ साध्यनावच्छिन्नव्या
पकेशारूपादिजलत्वेवाव्याप्तिरित्यर्थ तस्य साध्यवन्निष्ठाभावप्रतियोगित्वाभावादिति भावः तयोः पक्षधर्मसाधर्म्यसाधनावच्छिन्नसाध्याव्यापकयोः दुष्टत्वे ति

मू० म० वक्ष्यमाणरीत्या उभयत्रैव व्यभिचारोन्नायकत्वसत्वादितिभावः तयोरुपाधित्वानंगीकारे सिद्धांतविरोधमप्याह भिन्नेति क्वाकारेत्यादिमसध्य
स्पर्शाश्रयत्वेनातिप्रसक्तस्पर्शो किषपरूपः संबंधोपत्रेति अुलस्याप्रस्तसविषयताश्रयत्वेनेत्यर्थ तथ्याबाधेसाधनावच्छिन्नसाध्यव्यापकं द्वि
तीये पक्षधर्मावच्छिन्नसाध्यव्यापकमितिभेदेनोदाहरणद्वयमितिभावः प्रयोजकत्वेन व्यभिचारानुमानप्रयोजकत्वेन पक्षेतरइति पर्वतोवन्हिमा
न्धूमादित्यादौ एवं तेतरादावित्यर्थः नच पक्षेतरस्य प्रमेयत्वादेसर्वत्रसत्वेनसाधनव्यापकतया कथमतिव्याप्तिरितिवाच्यं तादात्म्यसंबंधेनतस्य
साधनाव्यापकत्वान्नतच तथापि पक्षे तादात्म्यसंबंधेन साध्याव्यापकतया कथमतिव्याप्तिरितिवाच्यं अतिव्याप्तेः उक्तदूषणोपपिकृतानस्याति
प्रसक्तेरित्यर्थात् पक्षातिरिक्त एव साध्यव्यापकत्वस्य ग्रासत्वात् व्यापकस्य साध्यस्य देहदशायामुपाधित्वम् इह कुत्रापि न स्यादिति भावः नचेतरशब्द
स्य सर्वनामतया सर्वनामकार्याप्रत्तिरिति वाच्यं पक्षः इतरो यस्मादिति बहुव्रीहिसमासात् बहुव्रीहिसमासेन सर्वनामकार्यनिषेधात् व्यतिरेक इति साध्य
व्यतिरेके साध्ये इत्यर्थः इत्यत्र हेतौ इतरामत्वस्येति वक्ष्यमाणस्यैव किंचिद्रूपेणोपपादितत्वादिति भावः व्यतिरेके अर्थविशेषणतालादितिस्वव्यतिरेकेणासाध्य
व्यतिरेके साध्ये व्यभिचारकविशेषणावत्वादित्यर्थ नसइति तथा च येन रूपेण साध्यव्यापकतात्तद्रूपावच्छिन्नस्याभाववत्त्वेन हेतुसाध्याभावसाधनेव्यभि राम०
चारकविशेषणाश्रयत्वे सति विशेषाणां देयमिति भावः बाधोन्नीतस्येति बाधोन्नीतत्वं बाधेन साध्यव्यापकतया प्रमितत्वं वन्हिरनुष्णः कृतकत्वादिस

लवह्नीतरस्यैवस्य सर्थः न चेष्टापत्तिरिति अभिचारावारकविशेषणाभावात्वेन व्यर्थविशेषणात्तयासत्प्रतिपक्षोत्थापकत्वस्योपाधेर्दूषकताबीजस्य तत्रा
भावादिति भावः विशेषणाविनेति वन्ह्यादिविशेषणं विनेत्यर्थ व्याप्यग्रह इति व्याप्तिग्रहासंभवेन सर्थ तस्यार्थकत्वादिति वन्ह्यादिविशेषणेऽदूषणाव
हस्य व्याप्तिग्रहानुपयुक्तत्वरूपवैयर्थ्यस्याभावादित्यर्थः तथा चोपाधितस्य साधकतया त्वदभिमतस्य वैयर्थ्याभावस्य तत्रासत्वेपि दूषणाव
हस्यैव यथ्यस्याभावात् सत्प्रतिपक्षोन्नयनसंभवेन तस्यानुपाधित्वे इष्टापत्त्यसंभव इति भावः आशयमविद्वानाशंकते वस्तुगत्येति पर्वतो धू
मवान् वन्हेरित्यादौ वैयेतत्रस्य न तथेति भावः भावमुद्घाटयति पक्षातिरिक्त इति सहचारज्ञानेनेति शेष तच्च तादृशसाध्यव्यापकताज्ञानं च तत्रापीति
वाधाभुत्रीत पक्षेतत्रत्वेपीत्यर्थ इति सांप्रदायिकाः वस्तुतस्तु अत्र साध्यव्यापकत्वं पक्षेतरीयत्वावच्छिन्नसाध्यनिरूपितमुक्तं साध्यसामान्यनिरूपितं वा
आद्ये पक्षेतरद्वति इत्यमुपलक्षणं पक्षमात्रवृत्तिसाध्यव्यापकेऽव्याप्तिरित्यपि द्रष्टव्यं अत्रेनाशंकते वस्तुगत्येतीति योजयंति ननु पक्षे साध्यसंदेह
सत्वेन व्यभिचारासंशयसत्वात् पक्षातिरिक्तस्थले सहचारज्ञानमात्रात्साध्यव्यापकत्वग्रहस्तत्र कथं स्यादित्यत आह अन्यथेति अनुपाधित्व इति साध्यव्या
पकतापात्रानिरूप्यत्व इत्यर्थः उपाधिमात्रमिति पक्षे साध्यसंदेहदशायां पक्षावृत्तित्वेन गृहीतस्य उपाधिकमात्रस्य साध्यव्यापकत्वनिश्चयप्रतिबंधेतेर्थः प
घाश्रते पक्षावृत्तित्वेन निश्चितानामेवोपाधिनां पक्षे साध्यसंदेहसत्वेपि साध्यव्यापकतानिश्चयसंभवात्संगते तथा [redacted] च पक्षे साध्यसंदेह

मू० म० सव्यभिचारसंशयोवानसाध्यव्यापकत्वनिश्चयपरीघंयीतित्वयाप्यभ्युपगंतव्यमितिभावः विपक्षाव्यावर्त्तकेति विपक्षः साध्याभाववान् तद्व्यावर्त्तकं
तन्निष्ठाभावप्रतियोगितावच्छेदकत्वासंपादकं यद्विशेषणं संबंधसामान्येन तच्छून्यं साध्यव्यापकत्वसाधनाव्यापकतावच्छेदकविशेषणाभिन्नमर्थः
तथा च विपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वासंपादकविशेषणशून्यसाध्यव्यापकतावच्छेदकसाधनाव्यापकतावच्छेदकधर्मवत्त्वमुपाधित्वमि
तिभावः संपादकत्वंचात्र स्वनिष्ठाभावप्रतियोगितावच्छेदकत्वमेतदधीनमितिप्रतीतिसिद्धः स्वरूपसंबंधविशेषः विपक्षाव्यावर्त्तकविशेषणावच्छिन्नसाध्य
व्यापकतावच्छेदकत्वे सति साधनाव्यापकतावच्छेदकं तद्वत्त्वमित्युक्तौ रूपेतरत्वविशिष्टपर्वतेतरत्वपर्वतेतरत्वविशिष्टरूपेतरत्वादावतिप्रसंग इत्य
तोनिषेधद्वयगर्भता बाधोन्नीतेति वह्निरनुष्णः कृतकत्वादित्यत्र वह्नीतरत्वस्य परिग्रहसमर्थयपक्षास्येव विपक्षत्वादिति पक्षास्येव विपक्षतया च नि
विशेषणास्येतरत्वनिष्ठविपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वसंपादकत्वादितिभावः ननु पर्वतेतरत्वादेरित्यादेरिति ननु पर्वतो वह्निमान् धूमादि
साध्ये पर्वतेतरत्वादेः परिग्रहसमर्थं तत्र पर्वतवितत्वीशेषणास्येतरत्वे पर्ववर्तमात्रनिष्ठाभावप्रतियोगितावच्छेदकत्वसंपादकत्वेन विपक्षनिष्ठाभा
वप्रतियोगितावच्छेदकत्वासंपादकत्वादितिभावः आदिपदात्पर्वतावयवस्पर्शवत्त्वपर्वतेतरद्रव्यत्वरूपपर्वतसंयोगानाधारत्वरूपेतरत्वरूपेतरत्ववि रम०
शिष्टपर्वतेतरत्वपर्वतेतरविशिष्टरूपेतरत्वादेः परिग्रह नवीनास्त्विति प्रथमांतं शून्यमित्यन्वयि तच्च विपक्षाव्यावर्त्तकविशेषणे उपात्तेतीति स्वघटकी

मतेति विशेषणोऽस्यार्थः स्वपदमुपाधितावच्छेदकपरं तथा च स्वघटकीभूतविपक्षाव्यावर्तकविशेषणाघटितं पक्षसाध्यव्यापकत्वसाधनाव्याप
ति कतावच्छेदकं तद्वत्त्वमुपाधित्वमित्यंक्लिप्तं मिति भाव सिद्धासिद्धीति स्वघटकीभूततादृशविशेषणत्वं प्रसिद्धमप्रसिद्धं वाऽऽपयापितादृशविशेषणा
भ्रम्यत्वस्योपाधितावच्छेदके व्याघात इत्यर्थः ननु तादृशविशेषणाघटितं पक्षसाध्यव्यापकतावच्छेदकसाधनाव्यापकतावच्छेदकं तद्वत्त्वं तादृश
विशेषणानवच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितापर्याप्त्यवच्छेदकं पक्षसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकं तत्त्वं नत्वं चोपाधि
त्वं विवक्षितमिति सत्त्वंसाद्वदघतांतरमादाय तथापि चेति साध्यव्यापकत्वं साधनाव्यापकत्व इति साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानेऽस्यार्थः
तत्र पक्षेतरत्वे तथात्वसमानत्वाव्यावृत्तितानेन पक्षे हेतुमति पक्षे साध्यव्यावृत्ति साध्यव्यावृत्तिनिश्चय अभिचारस्य वेति अभिचारज्ञानमवेत्यर्थः अ
भिचारेवेति व्यभिचारज्ञाने चेत्यर्थः अवश्यमुपाधिरिति अवश्यं पक्षेतरउपाधि व्यभिचारोन्नायकत्वस्योपाधेर्दूषकताबीजस्य सत्त्वादित्यर्थः तथा
च लेयाप पक्षेतरो नोपाधिरित्युपेपत इति तयाऽतिव्याप्तिरपाकृता वस्तुतो दूषकताबीजसत्त्वेन तदुपाधिधर्मत्वस्येवेतिभवतस्त्वत्रानुपाधिताभ्युपगमोऽ
युक्त इति भावः किं च विशेषणामपि व्यर्थमेवेत्याह पक्षेतर एवेति पक्षेतरस्तत्रोपाधिः स्यादेवेत्यर्थः अतद् इति शेष तावत्मात्रस्येति साध्यव्यापकतामात्र
स्येत्यर्थः मात्रपदादुक्तविशेषणाव्यवच्छेदः दूषकताबीजेति दोषोत्र पनोयपोगितादित्यर्थः चकारस्त्वर्थे विशेषणमिसंनंतरं योजः वनदेयमेवति

मू० म० शेषणमिति त्रिवाच्यं वतस्तस्यानुपाधिताभ्युपगमेन विशेषणदाने ऽति व्याप्त्यापत्तेरितिभावः अनुमानमात्रेति पक्षेत्र निश्चीतसाध्यकानुमात्रे
छेदकतयेत्यर्थः जातित्वादिति जात्युत्तरकत्वात्मथ्यः उपाधिव्यभिचारेण साध्यव्यभिचारमानुने कर्तव्ये पक्षेतरस्योपाधित्वेनोद्भावनीयतयात्व
व्याघातकमुत्तरं जातिरिति जातिलक्षणासत्वादिति भाव नयपक्षेतरइति तथ्या च विशेषणांसार्थक्यं मवकमेवेति भावः दूषणासमर्थेति दूषणासमर्थ
मुत्तरंजातिरित्यस्यैव जातिलक्षणत्वात् पक्षेतरस्य व्यभिचारोत्र मन समर्थ एवेति भावः प्रकारांतरमिति वाध्यानुन्नीतपक्षेतराभिन्नत्वादिकमित्यर्थः
उपाधित्वाभावेपीति त्वमाऽपाधित्वानंगीकारेपीत्यर्थ तथा च ग्रंथे विशेषणमितिभावः दूषकतावीजसत्वे एवतस्यानुपाधिताभ्युपगमस्तदारणा
पविशेषणमक्षेपचानुचितस्तदेवचनास्तीसभिवाधापेरणाशंकते अथेति सत्प्रतिपक्षतयासाध्याभावकतपा असाधारणत्वादित्तिसपक्षव्याव
त्तत्वादित्यर्थः अनुव्यभिचारानुमा-- तमाऽपाधिर्दोषः तत्र च नासाधारणपत्विमाशंकां निराकरोति न त्विति उपाध्यव्याप्यतयेति उपाधिव्यभिचारित
योर्थः साध्याव्याप्यत्वं साध्यव्यभिचारित्वं अनुमेयमिति शेष नसाध्यपकत्वमिति साध्यव्यापकत्वाभावोपि सिद्ध्यादित्यर्थः हेतावुपाधि अभिचारित्वेन
यमानेऽपाधावपि हेतव्यापकत्वमितिसाध्येयोज्ञानस्यावश्यकत्वात्समानसंवित्संवेद्यत्वादितिभाव ननु हेतावुपाधिव्यभिचारित्वग्रहदशायामुपाधा राम०
वपि हेत्वव्यापकत्वज्ञानस्यावश्यकत्वेपि हेतोर्व्याप्ति निश्चयाभावं तत्तद्व्यापकत्वेनसाध्यव्यापकताज्ञानं उपाधौ तु साध्यव्यापकतानिश्चयसत्वेन तत्तद्

भिचारित्वेन व्यभिचारित्वग्रहः इत्यत आह व्याप्तीति यथा साध्यस्य उपाधिव्याप्यताग्राहकव्यभिचारादर्शनसहचारदर्शने स्तस्तथा हेतावपि साध्यव्या
प्यताग्राहके ते स्त इत्यर्थः न हि तदानीं हेतौ साध्यव्यभिचारज्ञानमप्यस्ति स्फुटव्यभिचारादेनस्य वैयर्थ्यादिति भावः इत्यापातः यद्वा उपाधौ साध्यव्याप
कत्वग्रहे अनुकूलतर्काविर्भावादुपाधौ साध्यव्यापकतानिश्चयो जातः हेतौ तु साध्यव्याप्यताग्रहे अनुकूलतर्कानवतारान्न साध्यव्याप्यतानिश्चयो न जात
स्तत्रैव व्यभिचाराधारानुमानसंभवः तस्मादिति न च साध्यव्याप्यहेतुव्यापकतयोपाधेः साध्यव्यापकत्वज्ञानात् कथं तद्व्यतिरेकेण सत्प्रतिपक्ष
स्यैव संभव इति वाच्यं सत्प्रतिपक्षोत्थापकतया दूषकत्वपक्षे हेतावुपाधिव्यभिचारज्ञानस्यानपेक्षितत्वेन तुल्यवित्तिवेद्यतया उपाधौ साधनाव्यापकत्व
ज्ञानस्याप्यनावश्यकत्वात् यद्वा उपाधौ हेतुव्यापकताज्ञानं नास्ति तदैव सत्प्रतिपक्षसंवादिति भावः तत्प्रतिपक्षात् इत्यादिति यथा सत्प्रतिपक्षे सत्प्र
तिपक्षात् इत्यतः स्केनापि प्रतिबंधात् सत्प्रतिपक्षस्य बाहुल्यस्याप्रयोजकत्वात् तथा सत्प्रतिपक्षे उपाध्युद्भावनमपि नस्यात् भवन्मते उपाधि
मुद्भाव्य सत्प्रतिपक्षान्तरस्यैव करणीयत्वात् तस्य चाप्रयोजकत्वादिति भावः दूषकतान्तरमाह किं चेति एवं सत्प्रतिपक्षोत्थापकतया दूषकत्वे बाधोन्नीतोपीति
व किंतु परहेतुकत्वादिसत्प्रतिपक्षोन्नीतेरपीत्यर्थः व्यतिरेकेऽसाधारण्यादिति साध्याभावसाधनेन व्यतिरेकस्यासाधारणत्वादित्यर्थः पक्षमात्रवृत्तिहेतुरसा
धारण इत्यभिमानेनेदं ननु मास्तु बाधोन्नीतपक्षेतरोपाधिः स्फुटस्पाश्रयेनाशंकते नन्विति नोपाधिनियम इति न पक्षेतरोपाधिरिति नियम इत्यर्थः यथाश्र

तेतादृशसामान्यनियमसत्त्वेपिपक्षेतरस्योपाधित्वानावश्यकत्वान्निराकरणस्यानुपयुक्तत्वप्रसंगात् अतएवात्रपक्षेतरोपाधिनियमइत्यप्रसंग
च्छतेहेतुमतीतिसाध्यसमानाधिकरणाहेतुमतीत्यर्थः तेनसमवायादिसंबंधेनगगनादिसाध्यकेघटोगगनवान्द्रव्यत्वादित्यादौनव्यभिचारः नवाव्याप्य
वृत्तिसाध्यकेसद्धेतौव्यभिचारइतिवाच्यंनिरवच्छिन्नसाध्याभावाधिकरणत्वस्यबाधपदार्थत्वात् नचतथाप्येतद्घटप्रागभावकालीनैतद्घटसंयोगवान्पृ
थिवीत्वादित्यादावसंकीर्णबाधस्थलेव्यभिचारः तत्रपक्षस्यैवच्छेदकस्यैतद्घटप्रागभावकालावच्छिन्नत्वविशिष्टसमवायसंबंधावच्छिन्नसाध्याभावस्यनि
रवच्छिन्नाधिकरणत्वस्यापिपक्षेसत्त्वादितिवाच्यं तेनसंबंधेनसाध्यत्वेनत्रापिपक्षेतरस्योपाधित्वादितिभावः तादृशनियममभ्युपेत्याह प्रसक्त इति अ
जनत्वाहेतुरितिधर्मिपरोनिर्देशः तेजःसामान्येतरादिरूपपक्षेपक्षेतरस्यैत्यर्थः तद्व्यतिरेकस्यसाध्याभावसाधने साधारण्याभावात् सपक्षेसौरालोका
दावपिवृत्तेरितिभावः तथाचवह्नीतरत्वेनवह्नीतरस्यानुपाधित्वेपितादृशनियमोत्रानुपपन्नइतिहृदयं हेतुमतीत्यादिति यमाभ्युपगमेनैवदूषयति
तेजोमात्रेतितेजोभ्युपगम्यहेतुकत्वादित्यत्रेत्यर्थः अतेजस्त्वविनेति धर्मिपरोनिर्देशः सामान्येतरादिकं विनेत्यर्थः आदिनाभास्वररूपवद्भिन्नत्ववह्नीतरादेःपरि
ग्रहः अप्रसक्तेतिपक्षेतरस्येतिशेषः तेजःसामान्येतरादिव्यतिरेकस्यसाध्याभावसाधने साधारण्यं इत्येतरादिकं चनसाध्यव्यापकमितिभावः अप्रसक्तोपाधेर राम०
भावादिति यथाश्रुतंतुनसंगच्छते अतिरेकसाधारण्याभाववतोपिगुरुत्वादेःपक्षत्वावच्छिन्नसाध्यव्याप्यत्वोपाधित्वात् महत्त्वादावपि अतेजस्त्व अतेजस्त्वसमशी

त्वं विनाऽसाधारणाव्यतिरेकप्रतियोगित्वं विनेति भावः तेन भास्वद्रूपवदितरवह्नीतरास्यपरिग्रहः अन्यस्योपाधेरभावादिति अन्यस्य प्रसिद्धसाध्यव्यापक
स्योपाधेरभावादित्यर्थः तेन विशिष्टसाध्यव्यापकस्योपाधेरभावेपि न क्षतिरित्याहुः ननु पक्षमात्रवृत्तित्वेनासाधारणत्वं किंतु यावत्सपक्षव्यावृत्तत्वं
तेजःसामान्येतरादिव्यतिरेकस्य अनुपस्थिताभावे साध्येन तथा पक्षे साध्यस्यासिद्धौ सपक्षाभावात् सिद्धौ तु तत्रैव सपक्षे वर्त्तमानत्वादित्यस्वरसादृ
किंचेति दूरेति दूरसंयोगिपर्वतेतरत्वादेर्व्यवच्छेदः साध्यते तत्रापमुपाधिबोध्य दूरपर्वतोऽमत्वादिकं कृहेतरत्वादिविशिष्टपर्वतेतरत्वादिकमित्यर्थः य
तिरेकप्रति उक्तोपाधीनां व्यतिरेकस्य पर्वतीयवह्निगुणगौरवाद्व्याख्यापरार्थमात्रे दूरे च सपक्षे यथाक्रमं वृत्तेः यथा च बाधानुन्नीतपक्षेतरत्वासाधारणत्वविपक्षा
व्यावर्त्तकत्वसाद्दिशिशेषणादानेतैः । व्याप्तिरिभावः हेतोः सपक्षविपक्षव्यावृत्तत्वमसाधारणत्वं तत्र सपक्षव्यावृत्तत्वांशज्ञानं न हेतौ साध्यव्यतिरेकसहचा
रज्ञानरूपतया हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्यव्यतिरेकव्याप्तिज्ञानजनकं तथा चासाधारणत्वज्ञानं साध्यतदभावोभयव्याप्यस्य
तद्धेतुमत्तापरामर्शरूपसत्प्रतिपक्षद्वारा अनुमितावेव प्रतिबंधकं प्रतियोगिनापि पर्वतेतरात्मत्वादिनेति शेषः न चासाधारणत्वज्ञानस्यापि सत्प्रतिपक्षो
त्थापकतयेति साध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्याभावव्याप्तिव्यतिरेकव्याप्तेः साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपसाध्यातिरेक
व्याप्त्योर्ग्रहद्वारा साध्यतदभावोभयव्याप्यवद्धेतुमत्तापरामर्शरूपसत्प्रतिपक्षजनकतयेत्यर्थः दोषत्वादिति अनुमितावेव प्रतिबंधकत्वादित्यर्थ

र्थः तथाचासाधारणत्वेपि सत्प्रतिपक्षसंभवात् पक्षेतरोप्युपाधिरेवेति तस्यानुपाधित्वाभ्युपगमो वाद्रणाय तस्य विशेषणोपादानं च द्वयमप्युक्तमिति
भावः केचित्तु व्यतिरेकीणां व्यतिरेकव्याप्त्या पर्वतेतरत्वादिनापीति शेषः नचासाधारणपमिति व्यतिरेकव्याप्त्या सत्प्रतिपक्षेपि प्रतिबंधकमिति शेषः
तस्यापि असाधारणज्ञानस्यापि सत्प्रतिपक्षोत्थापकतयेति अन्वयसहचारग्रहप्रतिबंधकतया वेति शेषः दोषत्वादिति अनुमितावन्यथासि
ग्रहेप्रतिबंधकत्वादिसमर्थयद्भिस्तेपि पक्षाः वतत्त्वमसाधारणत्वं तदा तज्ज्ञानमुक्तक्रमेण सत्प्रतिपक्षजनकतया अनुमितावेव प्रतिबंधकं यदि च
हेतोः साध्यवद्व्यावृत्तित्वमसाधारणत्वं तदा तज्ज्ञानमन्वयसहचारग्रहप्रतिबंधद्वारा अन्वयव्याप्तिग्रहप्रतिबंधकं न तु कदाचिदपि व्यतिरेकव्याप्त्यास
त्प्रतिपक्षे प्रतिबंधकमिति भावः इति आचक्षुः ननु व्यभिचारोन्नायकतया दूषणत्वे भागे वमपादूषितं तत्पदसिद्धसत्प्रतिपक्षतया दोषत्वमपि तथा दूषितं तत्प
पक्षहेतव्याप्याधोर्व्याप्तियाहकसाम्यं तत्र कथमुपाधिर्दोषः इत्यत आह तस्मादिति उभयोः साध्यसाधनयोः साध्योपाध्योः विरोधादिति विरोधः साध्य
व्यापकत्वसाध्यव्यापकव्याप्यत्वयोः साध्यव्यापकत्वसाध्यव्याप्यव्यापकत्वयोश्चेति शेषः उपाधेर्व्यभिचारशंकाधायकत्वेन दोषत्वेप्याचार्यसंवादमाह
तदुक्तमिति उपाधेरेवेत्येवकारो भिन्नक्रमेण उपाधेर्व्यभिचारशंकैवेत्यर्थः पक्षोभयेऽव्याप्तियाहकसाम्यं तन्नेत्यादि सकलतत्त्वमानोच्छेदापत्तिभयेन परसो
पाधित्वं परैर्निरस्यात् तदपेक्षयाह भवतु वेति तथापीति नच पक्षावर्तकविशेषणानां च छिन्नोतिविशेषणाशृङ्गनादेवनाद्व्याप्तिरेतिवाच्यं तथापि

जमाराव:सकर्तृका कार्यत्वादित्यादावउभिन्नत्वादौ पक्षेतरेति आप्ते तत्रापउ विशेषणोन विपक्षस्य परमाणोरपि व्यावर्त्तमादितिभावः अयार्थत्वस्यांशस्
पत्तिनापीति पक्षेतरस्य साध्यविषमव्यापकत्वान्नोपाधिरितिभावः अवच्छिन्नसाध्यव्यापकोपाधावव्याप्तेस्तत्रामेव दूषणांतरमाह दूषकतेति विष
मव्याप्तस्यापीति तथा च तत्राव्याप्तिरितिभावः तथा दूषकतायामिति स्वव्यभिचारेणसाध्यव्यभिचारोन्नायकतया स्वव्यतिरेकेणसाध्यव्यतिरेको ना
यकतयावा दूषकतायामित्यर्थः साध्यव्यापकताद्रूपस्यानुकूलतर्कविधयैवोपयोगादितिभावः अव्याप्तिनिरासाय विषमव्याप्तयास्यालक्ष्य
त्वेविनिगमकमाह अथेति साध्यप्रयोजको धर्मः साध्यप्रयोजकीभूतधर्म एव उपाधिशास्त्रीयोपाधिव्यवहारविषयः साध्यप्रयोजकधर्मत्वं शास्त्री
योपाधिव्यवहारविषयत्वव्यापकमितिभावः स समा पक्षेसद्धेतावपिसाध्यसमव्याप्तेः तथास्यापत्ते प्रयोजकत्वं चेति साध्यान्वयव्यतिरेकोन्नायका
न्वयव्यतिरेके प्रतियोगित्वस्य प्रयोजकतापदार्थत्वादितिभाव अभवतः असत भवत सत तदप्रयोजकत्वादितिनिरुक्तव्यतिरेकोन्नायकान्वयव्यतिरे
कप्रतियोगित्वादित्यर्थः तथा च विषमव्याप्ते दूषकताबीजसत्वेपि शास्त्रीयोपाधिव्यवहाराभावान्न लक्ष्यत्वमिति भावः अमयोति न्यूनाधिकदेशवृत्तेरपि प्र
योजकत्वे इत्यर्थः उपाधित्वप्रसंग शास्त्रे उपाधिव्यवहारप्रसंग इह उपाधिव्यवहारविषयताव्यापकीभूते धर्मे तत्र दूषणोपधिकं च प्रयोजकं प्रयोजकत्वं
नत्वधिकं ननु व्याप्यत्वपर्यंतं अर्थत्वादिति नवैवं पक्षेतरेऽतिप्रसंग तथापि पक्षेतरस्य साध्यवत्वादावतिप्रसंगादिति विषमव्याप्तस्यालक्ष्यत्वे विनिगम

म०म० कांतरं शंकते नचिति प्रतिविंबते भ्रमविषयो भवति उपसमीपस्थे आदधाति स्वनिष्ठधर्मं संक्रामयतीत्युपाधिपदाचयुक्तत्वेरितिभावः स्फटिके लौहित्यमिति
लौहित्यभ्रमविषयीभूतस्फटिके इत्यर्थः आप्यत्वं साध्यव्याप्यत्वं च कास्तिभ्रमविषयो भवति असावुपाधिः असावेवोपाधिपदवाच्यः साध्यव्याप्य
एवोपाधिपदवाच्यतापत्तेरित्यत आह नचेति इतरेतरपर्यवसन्नत इत्यर्थः समव्याप्त एवोपाधिरिति समव्याप्त एवोपाधिपदवाच्य इत्यर्थः
उपाधिपदस्य योगारूढतया विषमव्याप्तेरुपाधित्वेपि योगार्थाभावादिति भावः पक्षधर्मनिष्ठभ्रमविषयीभूतधर्माश्रयत्वमात्रमुपाधिपदप्र
वृत्तिनिमित्तं नतु आश्रितरूपसंक्रामकत्वं जपाकुसुमादावव्याप्तेः तत्र विषमव्याप्तेपि संभवतीति स्वनिष्ठसाध्यव्याप्यत्वासंक्रामकत्वेपि दोषवशात् स्वनिष्ठध
र्मान्तरसंक्रामकत्वसंभवात् तथाप्युपाधिपदस्य सामान्यतो निष्ठभ्रमविषयीभूतः धर्माश्रयत्वरूपमेकप्रवृत्तिनिमित्तं तादृश्योपरागप्रमापानात् पर
तु विशिष्यस्फटिकनिष्ठभ्रमविषयीभूतलौहित्याश्रयत्वसाधननिष्ठभ्रमविषयीभूतसाध्यव्याप्याश्रयत्वादिरूपं नानैव प्रवृत्तिनिमित्तं पदार्थ
वाचकपदसम्भिंतपदसमभिव्याहारविशेषेणोपाधिपदं यत्पुनस्तेन धर्मसंक्रामकत्वेन बोधयतीति समभिव्याहारस्भवतीतोनेपामकः अतएव स्फटि
कस्य लौहित्ये जपाकुसुममुपाधिरिति वाक्यात् लौहित्यरूपधर्मसंक्रामकत्वमेव प्रतीयते एवं च साधनस्य साध्यव्याप्यत्वमुपाधिरित्यत्रापि स्वनिष्ठव्या रा०म०
प्तिरूपसंक्रामकत्वमेव लभ्यत इति तथा च विषमव्याप्तस्य स्वनिष्ठधर्मान्तरसंक्रामकत्वेपि तादृशधर्मसंक्रामकत्वमादाय पङ्क्त्याप्युपाधिपदप्रयोगानादर इत्याध

मंतरासंक्रामकत्वस्योपाधिपदप्रवृत्तिनिमित्तत्वाद्विषमव्याप्तस्योनोपाधिपदवाच्यत्वमित्याचार्याशयपय प्रवृत्तिनिमित्ताभावादिति यौगिकप्रवृत्तिनिमित्ताभा
वादित्यर्थःसमव्याप्तिरिति स्वनिष्ठव्याप्तीसंक्रामकइत्यर्थः स्वधर्मप्रतिबिंबेति स्वनिष्ठधर्मांतरप्रतिबिंबजनकत्वेत्यर्थः साभाराद्वपीति तत्रपुपाधिपद
स्यप्रयोजकत्वादित्यर्थः तथाचपयात्तत्रयोगार्थनिरपेक्षस्योपाधिपदवाच्यं तथाविषमव्यापके पि केवलरूढ्यर्थमात्रयोपाधिपदवाच्यत्वं संभवः नहियो
गार्थविशिष्टरूढ्यर्थःप्रवृत्तिनिमित्तभिन्नमिति तद्द्वयं लौकिकव्यवहारार्थमिति लोकानामुपाधिस्वरूपज्ञानार्थमित्यर्थः उपाधिपदव्युत्पादनमिति परोक्ता
नुमानदूषकस्यप्रस्तावेऽभावमुपाधेरित्युपाधिपदप्रयोगइत्यर्थः अनुमानदूषणार्थमिति उपाधित्वेनउपाधिज्ञानद्वाराव्याप्तिज्ञानप्रतिबंधार्थमित्यर्थः त
त्वेति अनुमानदूषणौपयिकरूपचेतुर्थ तेनैवसाध्यव्यापकत्वसाधनाव्यापकत्वमात्रेणौपयिकमव्याप्तस्याप्युक्तस्यैवविनिगमकांतरमाशंकते अमेतिति
पदभावःपदार्थविच्छिन्नत्वव्याप्यत्वसंबंधावच्छिन्नप्रतियोगिताकोपदभावःसाध्यव्यभिचारविरोधी साध्यव्यभिचाराभावसमनियतःसाध्यव्यभिचार्य
वृत्तित्वेसतिसाध्यव्यभिचाराभावव्यापकइतियावत् सउपाधिः तद्धर्मरूपेणासदुपाधिरित्यर्थः भवतिचार्द्रेंधनप्रभववह्नेःसाध्यसमव्याप्तस्यव्याप्यतासंबंधा
वच्छिन्नप्रतियोगिताकाभावः आर्द्रेंधनप्रभववत्त्वाद्व्याप्त्यमात्रविशिष्टयाधूमादिव्यभिचाराभावसमनियतः आर्द्रेंधनादेःसाध्यविषमव्याप्तस्याव्या
प्यतासंबंधावच्छिन्नाभाववत्त्वेनतथात्वस्यार्द्रेंधनाभाववपिसत्त्वेनतत्र-- -व्यभिचाराभावासत्त्वादितिभावः अत्रयदभावस्यउपाधितावच्छेदकसंबंधावच्छिन्नप्रत्ययाभावपर

मू० म० तेआर्द्रेंधनप्रभववह्न्यादावव्याप्तिसामान्यतोपदर्शितभावपरत्वे द्रव्यं पृथिवीत्वात्सत्त्वादित्यादौ स्वरूपसंबंधेन साध्यव्यभिचारित्वादेरप्युपाधितापत्तिः स्वरूपसंबंधेन तद
भावस्यापि साध्यव्यभिचारेऽधिकत्वात् ततः प्रतियोगितावच्छेदकीभूतविशेषणतां साध्यव्यभिचारविरोधित्वेन साध्यव्यभिचारवद्वृत्तित्वमात्रोक्तौ वह्निमान् धूमा
दित्यादौ महानसत्वाद्यावतिव्याप्तिः अव्याप्यत्वसंबंधावच्छिन्नमहानसत्वाद्यावतिव्याप्तिः अव्याप्यत्वसंबंधावच्छिन्नमहानसत्वाभावस्य महानसत्वव्या अ२
प्याभावनिष्ठस्य वह्निव्यभिचार्यवृत्तित्वात् साध्यव्यभिचाराभावव्यापकत्वमात्रोक्तौ धूमवान्वह्नेरित्यादावपि व्यापके आर्द्रेंधनादावतिव्याप्तिः साध्यव्य
भिचाराभाववद्वृत्तीत्युक्तावपि तथा वह्निमान्धूमादित्यादौ महानमहानसत्वाद्यावतिव्याप्तिस्त्व अतः साध्यव्यभिचारित्वाभावसमनियतत्वपर्यन्तं यद्धर्मावच्छि
न्नाभावत्वं साध्यव्यभिचारित्वं धविशेषणताविशेषसंबंधेन बोध्यं तद्विशेषणताविशेषसंबंधेन यद्धर्मावच्छिन्नवदन्यवृत्तित्वं साध्यतावच्छेदका
वच्छिन्नसाध्याभाववतिविशेषणताविशेषेणावर्तमानत्वे च न तु हेतुतावच्छेदकसंबंधेन वक्तव्यं धूमवान्वह्नेरित्यादौ धूमवत्सामान्यान्तरत्वादौ विषम
व्यापकेतिव्याप्त्यापत्तेः धूमवत्सामान्यान्तरान्यासंयुक्तत्वस्यापि असंयुक्तधूमवान्यत्रसंयुक्तोऽयमात्रवृत्तित्वनियततया धूमवदसंयुक्तत्वाभावसमनियतत्वा
त् ननु जयापि वह्निमान्धूमादित्यादौ वह्निसामान्याद्येसाधनव्यापकेतिव्याप्तिः अव्याप्यत्वसंबंधेन तदभावस्यापि वह्निव्यभिचाराभावसमनियतत्वात् नच राम०
साधनावृत्तित्वेन यद्भावो विशेषणतापरतिन्नावं धूमवान्वह्नेरित्यादावार्द्रेंधनप्रभववह्न्याद्यवच्छेदः विशेषणताविशेषसंबंधेनार्द्रेंधनप्रभववह्निमदन्यवृत्ति

तद्रूपस्यार्द्रेंधनप्रभववन्ह्यव्याप्यत्वस्यासत्वेन तत्संबंधावछिन्नार्द्रेंधनप्रभववन्ह्यभावस्य साधनीभूतवह्नित्वात् पर्य्याप्तव्याप्यत्वाभावो व्याप्यत्वं च विशेषणा
ताविशेषणताविशेषेणानद्रूपस्यावृत्तित्वे सति विशेषणताविशेषेण तद्वृत्तित्वं तत्संबंधावछिन्नार्द्रेंधनप्रभववन्ह्यभावस्य चानवृत्तिरित्युच्यते तदा
वह्निसामग्र्या हावतिव्याप्तिर्दुर्वारा तादृशव्याप्यत्वसंबंधावछिन्नवन्हिसामग्र्यभावस्यापि साधनीभूतधूमावृत्तित्वादिति चेन्न साधनाधिकरणावृत्तित्वेन पक्षा
वविशेषणादिति संक्षेपः अभावः अव्याप्यत्वसंबंधावछिन्नाभावः तस्याभावेपीति तस्याव्याप्यतासंबंधेनाभावसत्वेपीत्यर्थः व्यभिचारसत्वात् एतदेव शब्दो
ऽनित्योगुणत्वादित्यादौ विषमव्यापके प्रमेयत्वे व्याहयति अस्तिहीति भवति हीत्यर्थः अनित्यत्वव्यापकं अनित्य[illegible]त्वविषमव्यापकं प्रमेयत्वं अनित्यगुणा
विति यथा विशेष्यत्वं तद्व्याप्यं चेति अनित्यत्वविषमव्यापकं प्रमेयत्वं अनित्यगुणाविति यथा विशेष्यत्वं तद्व्याप्यं चेति अव्याप्यतासंबंधेन तेसंगछते तदन्या पं४
दृभावव्वेत्यर्थः नचानित्यत्वयोरिति नचगुणत्वेऽनित्यत्वव्यभिचाराभावोस्तीत्यर्थः प्रमेयत्वमिति यथास्वतंतुर्नत्वं रूपव्याप्यत्वस्यैवत्वाद्यवाद्रूनुगतत्वा
चात्रघटकतयाकेवलं॥ नचेति प्रमेयत्वस्य तदप्रसिद्धेन चतथाविनचगुणत्वेऽनित्यत्वव्यभिचाराभावोस्तीत्यसंगतं विशेषणताविशेषसंबंधेन साध्यव्यभिचा
रस्यैवलक्षणघटकतया गुणात्वजातौ तादृशानित्यत्वव्यभिचाराभावस्य सत्वादिवाव्यगुणात्वपदस्य गुणपदवाच्यत्वपरत्वादिति ध्येयं अतिरेकः अप्यतासंबं
धावछिन्नप्रतियोगिताकव्य[illegible]ातिरेकः तथासाध्यव्यभिचाराभावसमनियतसाध्यव्यापकेति साध्यव्यापकसंघतसाध्यप्यभूतं तस्ससाध्यसमव्याप

मु० म०

सेतियावत् व्याप्यं अव्याप्यतासंबंधेनाभाववत् ननु यदि साध्यसमव्याप्तस्यैवोपाधित्वं तदा व्यभिचारित्वारेचावश्यमुपाधिरिति भज्येत नहि सर्वत्र व्यभिचारिणि साध्य
समव्याप्तेनस्यात्तथाभिसंतत्राह व्यभिचारेति अंततरस्तनेनसाध्यसामग्र्यादीनांबहूमेवोपाधित्वं संभवतीति सूचितं ननु तस्मिन् स्वव्यापकत्वाभावात् कथं सा
ध्यस्योपाधित्वमिमतत्राह अभेदेपीति साध्यव्यभिचारविरोधित्वं साध्यव्यभिचाराभाववद्व्याप्यत्वमाश्रमिति यथाकृताभिप्रायेणसाध्यापकमहानसत्वाद
वतिव्याप्तिमाह तथापीति व्यभिचारे साध्यव्यभिचाराभावे षष्ठ्यर्थे सप्तमी साध्यव्याप्यसमहानसत्वादेरव्याप्यतासंबंधेनाभावोपीत्यर्थः तत्रव्याप्ये आव
श्यकत्वादिति साध्यव्याप्यसमहानसत्वादेरव्याप्यतासंबंधेनाभाववतिसाध्यव्यभिचाराभावस्यावश्यकत्वादित्यर्थः लाघवाद्युक्तिअपर्यविशेषणाना
रहितत्वाच्चेत्यर्थः इदं च व्यर्थविशेषणतालेश्याप्तिरेव न तिष्ठतीति प्राचीनमतानुरोधेन साध्यव्यापकव्याप्यत्वमपीति अव्याप्यतासंबंधेन साध्यव्यापकस्याभाव
इत्यर्थः दर्शितत्वादिति। अस्मिन् हि सादिना दर्शितत्वादित्यर्थः तथा च भवन्मते विषयव्यापकः। तिव्याप्तिविरहेपि महानसमुपाधिः को दोषः तर्हि सिद्धं तावपि सोपाधि
त्वापत्तिरिति चेन्न हि यत्किंचिदुपाधिमत्त्वेनैव सोपाधिता किंतु यत्किंचित्साध्यव्याप्यत्वमेवानोपाधिकत्वं इति साध्यव्याप्यव्यापकत्वसामान्याभाववत्त्वसोपाधित्व
मिमतत्राह न चेति। साध्यव्याप्यत्वं यत्किंचित्साध्यव्याप्यत्वं तथा च यथाकृतमनौपाधिकत्वं न त्वात् तदा उक्तस्वरूपं सोपाधित्वं स्यात् न चैवमिति भावः साध्यव्याप
कत्वमित्यहीति साध्यव्याप्तिग्राहकमिति शेषः नन्वेवमनौपाधिकत्वव्याप्तिग्रहे तदुभयमेव न स्यात् नहि साध्यव्यापकव्याप्यत्वं तत् अतिप्रसंगादित्यत आह अनौपाधिकत्वरीति श्रीराम०

व्याप्तिलक्षणे व्याप्तिग्राहके साध्यव्यापकत्वे साध्यव्यापकेच्छावच्छिन्नत्वेयथाः नतु नौपाधिकत्वज्ञानं व्याप्तिधीहेतुर्येनानवस्था स्यात् किं त्विसाध्यव्यभिचाराभा
वसमनियतत्वमेव विवक्षितमिति नातिनातिव्याप्तिरित्यस्वरसादाह किंचेति यस्मिनातियद्धर्मविशिष्टे यस्मिन्सतीत्यर्थः अनुमितिर्न भवतीति साधनेऽनु
मितिप्रयोजकं रूपं व्याप्तिपक्षधर्मतान्यतरदिति वृत्तीत्यर्थः तदेव दूषकतामिति तद्वृत्तितदेव दूषकताबीजमित्यर्थः तथा च साध्यव्यापकताविशिष्टे साधनाव्याप
कत्वसत्वेऽपि हेतौ साध्यव्याप्यसत्वात् साध्यव्यापकत्वविशिष्टे साधनाव्यापकत्वस्यापि दूषकताबीजाक्रान्तत्वेन तत्प्रावृत्तत्वादेवं न स्वरागमिति भावः ननु यद्ध
र्मविशिष्टे व्यतिरेकेणाहेतौ व्याप्तिपक्षधर्मतान्यतरक्षतिप्रतितद्धर्मविशिष्टे तद्धर्मवत्वे दूषकताबीजं एवं च साध्यसमव्याप्तत्वविशिष्टे साधनाव्यापक
व्यतिरेके साधर्म्ये साध्यव्याप्तेरेव शपकत्वात् साध्यसमव्याप्तेः साधनाव्यापकत्वं दूषकतां न तु साध्यव्यापकत्वविशिष्टे साधनाव्यापकत्वव्यतिरेके साधर्म्ये साध्यव्याप्तेरा
वशपकत्वात् साध्यसमव्याप्तेः साधनाव्यापकत्वं दूषकतां न तु साध्यव्यापकत्वविशिष्टे साधनाव्यापकत्वं साध्यव्यापकत्वविशिष्टे कुत्रचित्साधनाव्यापकत्वविरहेऽपि हे
पि हेतौ व्याप्तसत्वात् उक्तमत आह न वितिमद्व्यतिरेके यद्धर्मविशिष्टपव्यतिरेकेऽन्यस्मिन्हेतौ व्याप्तिपक्षधर्मतान्यतरक्षितिस्तत्सेव स्तु भमितिदूषकताबीजसत्वे निपामकमि
ति शेषः विरुद्धत्वादेरिति हेतुनावच्छेदकविशिष्टे साध्यसामानाधिकरण्याभावादेरित्यर्थः साध्यसामानाधिकरण्याभावस्य व्यभिचारेऽपि सत्वादिति भावः आदिना
सपक्षसत्वविपक्षगामित्वपरिग्रहः साधनावच्छिन्नेति कारुः श्यामो मित्रातनयत्वादित्यादौ शाकजत्वादरावव्याप्तेरित्यर्थः ननु सः श्यामो मित्रातनयत्वादित्यत्र शाकपाकज

२८

मू.म. त्वेध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वे वाऽस्ति तत्र साधनस्यापि पक्षधर्मतया व्याप्यभावात् इदमुपलक्षणं पर्वतो वह्निमान् धूमादित्यादावपि वर्तीयत्याह
वतिव्याप्तिरिति यदि इत्यर्थं ज्ञानातिव्याप्तिमाह शङ्क इति उपाधित्वापाताच्चेति उपाधित्वेन ज्ञानापाताच्चेत्यर्थः पक्षे साध्याव्यापकत्वस्यावश्यत्वाद्व्याघातात्तदे
वयाह यतीति शङ्कधर्मे इति पक्ष इत्यादापितिनिश्चितमिति शेषः व्यापकं व्यापकत्वेन निश्चितं अव्यापकं अव्यापकत्वेन निश्चितं न च पक्षे व्यभिचारज्ञाना
सत्वेन कथं तत्र रूपादेः साध्यव्यापकत्वनिश्चय इति वाच्यं संदिग्धसाध्यकपक्षावृत्त्युपाधिमात्रस्य साध्यव्यापकत्वमानोच्छेदापत्त्या पक्षीयसाध्यसंदेहा
दितव्यभिचारसंदेहस्य साध्याव्यापकतानिश्चयाप्रतिबन्धित्वादिति भावः ननु तथाज्ञानदशायां तस्यापि दोषत्वमस्त्येवेति तत्र तथाज्ञानं न दोषायेतस्वर
साद्यहाव्यार्द्रेन्धनेति यद्यपि तत्रापि दृश्यत्व पर्वतत्वादिर्वत्तावच्छेदकधर्मः संभवति न च विशेषणतया दृश्यत्वादिकं न धर्मादिरिति स्फुटं धनादिव्यापकतावच्छेदक
मिति वाच्यं तस्य व्याप्यतावच्छेदकत्वेपि तद्विशिष्टसाध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपव्यापकताया आर्द्रेन्धनादावनपायात् तथापि पक्ष
निष्ठतादृशधर्माभावात् आर्द्रेन्धनादेरमुष्य साध्यव्यापकताया हेतोर्लेशस्यैव यद्धर्मविशिष्टव्यापकतायां हेतोर्भवति तादृशपक्षवृत्तिधर्माभावात् इत्यर्थः तथा च दी३
पक्षेन्धनादेः पक्षवृत्तिधर्मावच्छिन्नसाध्याव्यापकताग्रहो नास्तीत्यमुष्य साध्याव्यापकताग्रहमात्रं वर्त्तते तत्रापि व्याप्तिग्रहमात्रिबन्धात् ज्ञाना व्याप्तिरिति भावः केचि रामः
त्तु तत्र पक्षधर्मपदेन पक्षवृत्तिधर्ममात्रमुक्तं विवादपदं पक्षसमानाधिकरणधर्म आधेयज्ञानातिव्याप्तिमाह दृश्येति अयं भ्रमत्वव्याप्तिमाह आर्द्रेति इदं धूमवान् वह्नेरित्या

दैश्चार्द्रेंधनाद्यवच्छिन्नव्याप्तिरित्यर्थः आर्द्रेन्धनावयुः प्रसक्त इत्यादौ उद्भूतरूपादिपरिग्रहः ॥ अतएव पक्षे नियतेत्युक्तमित्याहुः नचेदं पूर्वलक्षणेप्युपाधिः संभवति ज
न्मत्वस्यापि पक्षधर्मत्वादित्याह श्यामत्व इत्यादि मित्रातनयत्वेन काकादौ श्यामत्वसाधने इत्यर्थः विरुद्धस्य तस्योपाधावव्याप्तिसत्वेपि स्फुटत्वात्तदुपेक्ष्य दू
षणांतरमाह पक्षधर्मेति वायुः प्रत्यक्षः प्रमेयत्वादित्यादावुद्भूतरूपवत्वादावव्याप्तिरित्यर्थः ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादावुद्भूतरू
पवत्वादावित्यर्थ तत्र साधनीभूतप्रत्यक्षस्पर्शाश्रयत्वावच्छिन्नसाध्यव्यापकत्वस्यापि सत्वेनाव्याप्त्यभावादिति दूषणं पूर्ववत्तज्ज्ञानातिव्याप्तिमाह जलमिति उ
पाधित्वप्रसंगात् उपाधितज्ज्ञानप्रसंगात् पक्षे साध्याव्यापकताया वस्तुतिआहेरभावात् नन्वेवमपि तथाज्ञानदशायां तस्यापि दोषत्वमस्त्वेवेति तस्यतघा
तानं न दोषायेत्यत आह सोपाधित्वादिति वह्निमत्वं धूमासाधकं सोपाधित्वादित्यादि सत्वासाधकत्वानुमाने इत्यर्थः साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वाद्
ति वह्न्यवच्छिन्नधूमव्यापकव्यभिचारी वह्न्ये सोपाधित्वे हेतावित्यर्थः साधनावच्छिन्नेत्यस्येति वच्छिन्नधूमव्यापकव्यभिचारित्वं वह्न्यवच्छिन्नधूमव्यापका
वच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववत्त्वं वह्न्यवच्छिन्नधूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव
वृत्तित्वमिति पावततेन वह्न्यवच्छिन्नधूमसमानाधिकरणात्यन्ताभावप्रतियोगिताभावप्रतियोगितावच्छेदकत्वाभावयोर्भेदाभावेत्वेन तस्यावच्छिन्ने सत्य
वैयर्थ्यप्रसंगात् इत्यर्थः ननु तादृशाभावयोर्भेदाभावेऽपि पर्याप्तसन्निवेशेन वैयर्थ्यं अन्यथा तव्यापि साध्यव्यापकव्यभिचारित्वादिमन्न साध्यव्यापकेति

मु० म० समर्थसाध्यव्यभिचारित्वमात्रस्यैवसम्यक्त्वात साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्यापिसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत
यात्साध्यव्यापकव्यभिचारित्वघटकत्वात्वस्तुतस्तुआर्द्रेंधनाद्यप्रत्वादिस्मादिपाति स्विकरूपेणोवासाधकत्वंसाध्यते नतुसामान्यतःसाध्यतावच्छि
न्नसाध्यव्यापकव्यभिचारित्वेनेतिकत्वैयर्थ्यसंभावनाइत्यस्वरसादाह किंचेति पक्षद्वयेपीतिस्मरणाद्वयेपीत्यर्थः साधयित्वेति उपाधिव्यतिरेकेणउपाधि
व्यभिचारेणवासाध्यपित्वेत्यर्थः साधनीयइति विशेषणाव्यभिचारित्वेसतिविशिष्टसाध्यव्यभिचारित्वेनविशेषणावत्वेसतिविशिष्टसाध्याभावव
त्त्वेनवाहेतुनासाधनीयइत्यर्थः उपाधेःप्रकृतसाध्यव्यतिरेकस्यवासाधनासंभवात अनुकूलतर्कविरहादितिभावः परंपरयाप्रकृतोपयोगिनार्थान्तराभिप्राये
कृते प्रथमेति अप्रामाण्यकालत्वादिति प्रथमंविशिष्टसाध्यव्यभिचारस्याभिधानादित्यर्थः प्रभाकरोपाध्यायमतंशंकते प्रथमेति उद्भावकः विशेषणाव्यभिचारित्वेस
तिविशिष्टसाध्यव्यभिचारित्वेनसाधनीय तत्रासिद्धाविति तत्रविशिष्टसाध्यव्यभिचारेसिद्धाप्युपादितायांतसिद्ध्येउपाधिरुद्भाव्यइत्यर्थः प्रकृतेति प्रकृता
नुमानविरोधिप्रकृतसाध्यव्यभिचारासाधकत्वादितिभावः ननुविशिष्टसाध्यव्यापकत्वज्ञानेनापिविशेषणावतिउपाधिव्यभिचारित्वेनहेतुनाप्रकृतसाध्यव्यभि
चारानुमानंसंभवति विशेषणावतिविशिष्टसाध्यव्यापकव्यभिचारित्वेविशेष्यव्यभिचारित्वस्यावश्यकत्वात इत्यतआह किंचेति पक्षधर्मेतिसाधनस्याप्र राम०
पतलक्षणं पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकस्योपाधेर्व्यभिचारस्योपन्यासेनुपपत्तिरित्यर्थः नोपाधिमत्त्वेनोपाधिःनचेष्टापत्तिः कथकसंप्रदायवि

रोधाहितहेतावुपाधिः अयं हेतुः सोपाधिरित्येवस्य कस्य कथयैरुद्भावनादिति भावः इदं च दूषणांतरमेव बोध्यं न केवलमिह यद्यपि व्यभिचारितादिसंबंधेनो
पाधिरपि साक्षाद्धेतुसंभवतीतथाप्यस्य समाधानस्य यद्वेति कृत्वायं यत्कृतेवाग्रे सत्स्वयं वक्ष्माराद्धा संगतिः व्यभिचारितादिसंबंधस्य व्याप्यनियामकत्वान
व्याप्यतावच्छेदकत्वमित्यभिमानेनेदमित्यपि केचित् एवकारो व्यकारत्वस्वरूपमाशंकते स्यादेतदिति एतन्मूलस्य पक्षे सत्यपक्षोन्नापकत्वं इव कताबीजमे
व साधनाव्यापकत्वविशिष्टं सत् तल्लक्ष्यता नियामकं न तु व्यभिचारोन्नायकं पक्षधर्मिताबलस्य व्यभिचारज्ञानस्य प्रकृतानुमानमूलभूतसाध्यतावच्छे
दकावच्छिन्नसाध्यव्याप्तिज्ञानाविरोधितयाः किंचित्करत्वादिति ध्येयं अनित्यत्वातिरिक्तेति अनित्यत्वातिरिक्तो यः शब्दवृत्तिधर्मस्तद्वतिरिक्तोपाधर्मस्त इ
त्यभिप्रायः पर्यवसितं च साध्यमनित्यत्वमिति अनित्यत्वातिरिक्तो यः शब्दधर्मस्तद्वतिरिक्तं विविशिष्टाभावत्वादुभयोः शब्दधर्मातिरिक्तं घटत्वादिकमनित्य
त्वं च अत एवाधारनित्यत्वस्यैव पक्षधर्मतावलेनासिद्धत्वादिति भावः तस्याव्यापकमिति मूलं साध्यस्य केवलान्वयितया तद्व्यापकत्वासंभवादिति भावः न
वेदुंसदनुमानेनेवेति कथमत्रोपाधिरिति वाच्यं मीमांसकमतेनाभिधानात् वैः शब्दस्य नित्यत्वांगीकारात् न द्वाशब्दपदद्वयं शब्दत्वपरं तथा च शब्दत्वं व्याति
सात्वातिरिक्तशब्दत्वधर्मातिरिक्तधर्मवत्त्वमेयत्वादिसत्त्वैस्यर्थः उदाहरणांतरमाह यदि चेन्नित्यत्वेवेति शब्दत्वं हेतुकत्वातिरिक्तशब्दधर्मातिरिक्तधर्मवत्त्वमेयत्वा
दिसाधित्वमेतोस्यार्थः तदा अनित्यत्वमिति पक्षधर्मावलंबस्यमूलतत्त्वव्यापकत्वव्यापकत्वादितिभावः न चैवं पर्वतो वह्निमान् धूमादित्यादौ पर्वतीयवह्निव्यापक

त्वात् पर्वतत्वपाषाणमयत्वादावतिव्याप्तिरिति वाच्यं पक्षावृत्तित्वे सतीत्यनेन विशेषणीयत्वादिति तद्दूष्यं पक्षधर्मतावच्छेदकसाध्यव्यापकस्योपाधित्वेऽप्या
वश्यकत्वादाह तदुक्तमिति कथं तत्साध्येति बाधोन्नीतसाध्यं साध्यतावच्छेदकावच्छिन्नसाध्यमेव यावत्त्वं नियमस्तु तोऽपि तद्व्यापकतारहितोऽपि पर्वतवृत्तित्वं नियम
मेयउपाधिः पक्षधर्मतावच्छेदकव्याप्यीकुर्वन्नुपाधिः कृप्यकैरुद्भाव्य इत्यर्थः उद्भावने हेतुमाह दूषकतेति सम्प्रति पक्षेतरव्यापकत्वस्य दूषकताबीजस्य
त्वादित्यर्थः एवं हीत्यादि पक्षधर्मतावच्छेदेन नित्यद्रव्यसमवेतत्वासिद्ध्येऽसमवेतत्वे द्रव्यासमवेतत्वस्योपाधिस्यारणापसावपवत्व इति द्रव्यसमवायिकारण
त्वेतिहेत्वर्थः जन्यमत्वेति अत्र द्रव्यत्वमात्रस्य हेतुत्वे गगनादौ व्यभिचारस्तन्नधिकरणानां तावन्मात्रोपादाने रूपादौ व्यभिचार इति द्रव्यत्वोपादानं जन्मानधि
करणद्रव्यत्वस्याप्रसिद्ध्या जन्यमहत्त्वेति परमाणुत्वसिद्धिदशायामाकाशादौ व्यभिचारवारणाय महापदं जन्येति अत्वं अभाववत्वात् नवे पक्ष्यं मिति तिथ्येयं उपाधिः स्या
दिति उपाधित्वेन ज्ञातः स्यादित्यर्थः पक्षे पर्यवसितसाध्यव्यापकत्वेन यस्त्वतिव्याप्तेरभावात् अत्र समवेतत्वमात्रस्य पक्षावृत्तित्वात् नित्यः स्पर्शद्रव्ये पर्यवसित
साध्यसमव्याप्तस्त्वोपाधिरिति यदि मात्तत्त्वाप्रतिव्याप्तिरिति प्रदर्शनाय द्रव्येति तस्य व्यापकमिति पक्षातिरिक्ते तस्य व्यापकतया हि तन्मित्यर्थः ननु भवन्मतेऽपि
स्पर्शवदसमवेतत्वस्योपाधित्वेन ज्ञानापत्तिः पक्षातिरिक्ते उद्भूतसाध्यव्यापकताज्ञानसंभवात् पक्षोऽसाधनाव्यापकत्वज्ञानसंभवाच्च यदि चाव्यवधानेन व्याप्यसंग्रहः
विपक्षबाधकतर्केण कस्यचिन्नित्यं स्पर्शवत्तः सिद्धौ तत्समवेतत्वं पक्षधर्मतावच्छेदकमेव भवति अथापि संभवादनेनापि नित्यद्रव्यसमवेततामावत्वेन साध्यताव

छेदकेनवानाक्रांतत्वादित्यस्वरसादाह किंचेति पक्षधर्मतावललस्येति पक्षधर्मतावललसम्बन्धायाः साध्यव्यापकतेः सिद्धावित्यसमर्थः निष्कलङ्कोपाधिरितिष्फलंउपा
धित्वेनज्ञानमित्यर्थः कस्याव्यापकस्यव्यापकत्वेनग्रहे हीत्यसमर्थ तज्ज्ञानंविनातद्व्यापकत्वग्रहायोगादितिभावः ननु प्रकृतानुमानेनतद्ग्रहीताउपाधौतद्व्यापक
त्वग्रहोयतस्तदैवसिद्धसिद्धिव्याघातः किंतु अनुमानांतरात प्रमाणांतरेणवातद्गृहीताउपाधौतद्व्यापकत्वग्रहःस्यादित्यतआह नहीतिनवेत्यर्थः सोपा
धित्वेनज्ञातोयस्यव्यापकइतितथाचसोपाधौसाध्यस्यपक्षधर्मतावललम्यत्वेमेवासिद्धमितिभावः इदमुपलक्षणं वायुःप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्या
दावुद्भूतरूपवत्त्वादावव्याप्तिश्च नहितत्रवहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वादिकं पक्षधर्मतावललम्यतेनचपक्षधर्मतावललम्यत्वं यदाकदाचित्पक्षस्यकस्यापिसक्ष
धर्मतावललम्यत्वंवक्तव्यं अतस्योद्भूतत्वस्यादावविनाव्याप्तिः विशिष्येसाध्यवाज्ञानादित्यसहकारेणवहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वादेरपिकदाचित्पक्षधर्मतावल
लम्यत्वंतिष्ठतीतिवाच्यं प्रसिद्धानुमानेमहानसत्वादेरप्युपाधितापत्तेर्महानसीयवह्न्यादेरपिकदाचित्पक्षधर्मतावललम्यत्वेनतद्व्यापकत्वादित्यास्तांविस
रः॥ ॥उपाधिलक्षणपूर्वपक्षरहस्यं प्रथमतोलक्ष्यतानियामकंलक्ष्यतावच्छेदकंनिर्वक्तियद्वेति अस्यलक्षणरूपत्वेलक्षणोल्लिखितमित्रंग्रंथासंगतेर्म
द्व्यभिचारित्वेनेत्यत्रसहार्थतृतीयासाधनस्यसाधनेसत्त्वार्थेषष्ठीविधानात् साध्यव्यभिचारादित्वविशिष्टवर्त्ततइतिशेषः तथाचयद्व्यभिचारित्वविशिष्टंसाध्यव्य
भिचारित्वंसाधनवृत्तिसउपाधिरितियथाश्रुतोर्थः वायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वात्प्रमेयत्वादित्यादौविशिष्टसाध्यव्यापकोपाधीनांउद्भूतरूपवत्त्वादीनांअभि

३

मू० म० चारित्वेन विशिष्टसाध्याव्यभिचारित्वमपि साधनवृत्ति भवत्येवेति न तत्राव्याप्तिः वह्निमान् धूमात् द्रव्यं पृथिवीत्वादित्यादि सद्धेतौ साध्यव्यापके वह्निसामग्रीमत्
गुणवत्त्वादावतिव्याप्तिवारणाय साधनवृत्तित्वप्रवेशः साधनपदं च साधनतावच्छेदकीभूतावच्छिन्नाधिकरणत्वपरं तेन द्रव्यं विशिष्टसत्त्वादित्यादित्यादौ विशिष्टस
त्त्वादित्यादित्यादौ विशिष्टसत्तानतिरिक्तत्वेऽपि निर्गुणवत्त्वादावतिव्याप्ति वह्निमान् धूमादित्यादौ द्रव्यं पृथिवीत्वादित्यादौ च सद्धेतौ साध्याव्याप्यस्य महानसत्वघ
टत्वादेर्वारणाय साध्याव्यभिचारित्वप्रवेशः सामानाधिकरण्येन विशिष्टसाध्याव्यभिचारित्वमित्युक्तौ धूमवान् वह्नेः रूपवान् द्रव्यत्वादित्यादौ साधनव्यापकवह्नि
सामग्रीमत्त्वद्रव्यत्वादावतिव्याप्तिरतो यद्व्यभिचारित्वविशिष्टमिति यदव्यभिचारित्वं साध्याव्यभिचारित्वं च साधनतावच्छेदकावच्छिन्नाधिकरणावृत्तीत्युक्तौ पर्वतो धू
मवान् वह्नेरित्यादौ पर्वतेतरत्वमहानसेतरत्वादेरिदं गुरुरूपादित्यादौ पृथिवीत्वाभाववद्घटत्वाभावादेश्चोपाधित्वापत्तिरतो विशिष्टत्वप्रवेशः तेषां व्यभिचारित्ववि
शिष्टसाध्याव्यभिचारित्वं च न कुत्रापि हेत्वव्यक्तौ तदधिकरणताव्यक्तौ वेति सुरासः स्फुटत्वात् किन्तु तत्र रूपत्वावच्छिन्नाधिकरणत्वस्यैव वह्नित्वरूपत्वावच्छि
न्नाधिकरणतानुयुक्तसंयोगसकलत्वव्यधिकरणस्याधिकरणसाधारणातिरिक्तेन तदवच्छिन्नाधिकरणत्वकल्पने गौरवात् मानाभावाच्च अत एव रूपवान् द्रव्यत्वा
त् द्रव्यं सत्त्वादित्यादावपि पृथिवीत्वाभाववद्घटत्वाभावादेर्नातिव्याप्तिः हेतौ पृथिवीत्वाभावादिव्यभिचारित्वविशिष्टसाध्याव्यभिचारित्वेऽपि कुत्रापि हेत्वधिकरणताव्यक्तौ राम०
तद्विशिष्टसाध्याव्यभिचारित्वविरहात् अवश्यं तु सत्पृथिवीत्वजलत्वादिविशिष्टद्रव्यत्वत्वसत्तात्वावच्छिन्नाधिकरणतायाः चैव द्रव्यत्वत्वसत्तात्वावच्छिन्नाधिकरणता

बुद्ध्युपपत्तौ पृथिव्यादिनिष्ठसाधारणातिरिक्तैकद्रव्यत्वाद्यवच्छिन्नाधिकरणतापानुगमादित्र प्रसाधारणातिरिक्तैकसत्तात्वाद्यवच्छिन्नाधिकरणतायाम्भव
स्यनेगौरवान्मानाभावाच्च इत्थंच यद्धर्मावच्छिन्नव्यभिचारित्वविशिष्टसाध्यव्यधिकरणत्वाधिकरणांसाधनतावच्छेदकावच्छिन्नसाधनाधिकरणत्वंसाध्यस
मानाधिकरणवृत्तितद्धर्मवत्त्वमिति विवक्षितः तेन धूमवान्वह्नेरित्यादौ आर्द्रेंधनेन द्रव्यत्वादिरूपेणोपाधिधूमवान्वह्नेरित्यादौ विरुद्धस्य जलत्वादेरुपाधिता
वारणाय वक्तृसंतंतद्धर्मविशेषणं साध्याधिकरणतानिष्ठाधारतानिरूपिताधेयतावच्छेदकत्वेनेत्यर्थः तेन द्रव्यं प्रमेयत्वादित्यत्राप्रामत्वविशिष्टसत्त्वं द्रव्य
सत्त्वादित्यत्र द्रव्यभेदविशिष्टगुणभेदस्य नोपाधि यद्धर्मावच्छिन्नव्यभिचारित्वं च यद्धर्मावच्छिन्नवदन्यवृत्तित्वं यद्धर्मावच्छिन्नाभावीयनिरवच्छिन्नाधिक
रणतावच्छेदकत्वं वा तेन गंधवान्द्रव्यत्वादित्यादौ साध्यव्यापके संयोगादौ नातिव्याप्तिः द्रव्यत्वाभाववान्सत्त्वादित्यत्र साभाववद्वृत्तित्वरूपस्वव्यभिचारित्वे
न हेतौ साध्यव्यभिचारानुमानसमर्थेपि संयोगाभावादेर्न्यायत्ववक्ष्यमाणलक्षणानाक्रांतत्वादेतो न तत्राव्याप्तिः न च तथापि धूमवान्वह्नेरित्यादौ साध्यव्याप
महानसत्वादावतिव्याप्तिः तद्व्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वस्यापि हेतुव्यधिकरणतावृत्तित्वादिति वाच्यं तत्रैतस्य लक्ष्यत्वात् महानसत्वायोगोलकान्तराव ॥ तर
वच्छिन्नधूमव्यापकत्वेसति तदवच्छिन्नवह्निव्यापकत्वेन वक्ष्यमाणलक्षणाक्रांतत्वात् सर्वे साध्यसमानाधिकरणाः सद्धेतूपाधयः हेतोरेकाग्रपेयेषां स्वसाध्य
व्यभिचारितिसिद्धांतात्स्वव्यभिचारीतात्साध्यव्यभिचारितोच एकाग्रपेएकस्मिन्नधिकरणे हेताविति तदुत्तरवाक्यार्थः एकस्मिन्नधिकरणे समुपादानात्पर्वतो

धूमवान्वह्नेरित्यादौ पर्वतेतरत्वमहानमहानसेतरत्वादेरिदंगुरुत्वादित्यादौ पृथिवीत्वाभावघटत्वाभावादेश्चासंग्रहः न च तत्र तेषामपि संभाव्यत्वमस्त्विति वाच्यं
व्याप्तिपक्षधर्मतयोरेकतराभिगमस्यावश्यकतया व्यभिचारित्वेन विशेषितेन साध्यव्यभिचारानुमानासंभवात् तद्रूपवान् द्रव्यत्वात् द्रव्यं सत्त्वादित्यादेरपि पृथिवीभा
वघटत्वाभावादेर्न संग्राह्यः जलसमवेतत्वादिविशेषितेन तद्व्यभिचारित्वेन तत्र साध्यव्यभिचारानुमानसंभवेऽपि तद्व्यभिचारित्वसाध्यव्यभिचारित्वयोरेक
स्मिन्नधिकरणे हेतावसंभवात् तदनुपाधित्वस्योपाध्यापादिसकलतांत्रिकसंमतत्वाच्चेति सर्वं चतुरस्रं केचित्तु हेतोरेकाश्रये हेतुरूपे एकस्मिन्नधिकरणे
एकस्यां हेतुव्यक्तावितियावत् तेन रूपवान् द्रव्यत्वात् द्रव्यं सत्त्वादित्यादौ पृथिवीत्वाभावघटत्वाभावादेरपि संग्राह्यः इदंगुरुत्वादित्यादौ तु न संग्राह्य एकस्या
एव वह्निव्यक्तेरयोगोलकपर्वताद्युभयवृत्तिसंभवे धूमवान्वह्नेरित्यादौ पर्वतेतरत्वमहानसेतरत्वादेरपि संग्राह्यः वक्ष्यमाणलक्षणस्य तत्राव्याप्त्यापत्तिरि
तिवाच्यं तद्रूपलक्षणस्यापि न साधारण्यात् पाश्चात्यैर्व्याख्यास्यमानत्वात् न च तत्र तेषां संग्राह्यत्वे आधेयव्यक्तेरेकत्वेऽपि तद्व्यक्त्यधिकरणव्यक्तिभेदेनाधिकर
णाव्यक्तिभेदात् पक्षान्तरमलक्षणतावच्छेदकस्य तत्राव्याप्त्यापत्तिरेकहेतुव्यक्तिरूपत्वावच्छिन्नस्यापुक्तविशेषणस्य सकलरूपाधिकरणसाधारणस्यैकस्य
क्तत्वादिदंगुरुरूपादित्यादौ पृथिवीत्वाभाववद्व्याप्तिः तत्र न रूपत्वरूपतायाः सर्वसंमतत्वादिति वाच्यं पक्षव्यभिचारित्वेन पक्षेऽसिद्धव्यापकताकत्वेन सहसाधन
स्यासाधनतावच्छेदकावच्छिन्नसाधने साध्यव्यभिचारित्वं साध्यनिष्ठव्यापकताकत्वं वर्त्तते स उपाधिरित्यर्थः तथा च साधनतावच्छेदकावच्छिन्नमप्यसाधनस्य

त्यव्यापकतावच्छेदको यो धर्मः साध्यसमानाधिकरणावृत्तितद्धर्मवत्त्वमुपाधित्वमिति फलितमिति न कोपि दोष इत्याहुः तदसत् रूपवान् द्रव्यत्वादित्यादौ पृथिवी
त्वाभावादेरुपाधित्वस्योपाध्यायादिभिरुक्ततया त्रिकसंमतत्वात् अन्ये तु यद्धर्मावच्छिन्नवत्त्वेन विशिष्टे साधनाधिकरणे साध्यवत्त्वस्य वर्तते तद्धर्मा
वच्छिन्नत्वमुपाधित्वमित्येवं लक्ष्यतावच्छेदकं साध्यवात् तथा च द्रव्यत्वावच्छिन्नाधिकरणत्वस्य सकलाधिकरणत्वं साधारण्ये कत्वपक्षेपि रू
पवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादौ नातिव्याप्तिः नवा रूपत्वावच्छिन्नाधिकरणताया एकत्वेपि इदं गुरुत्वपादित्यादौ तत्राव्याप्तिश्च इत्थं च यद्व्यभि
चारित्वेन यद्धर्मावच्छिन्नवत्त्वम् तेन तत्रीपाच सहार्थे साधनस्य समनंतरमधिकरणस्येति शेषः साध्याव्यभिचारित्वं साध्याव्यभिचारवद्भिन्नत्वं स उपाधिः
तद्धर्मावच्छिन्न उपाधिरित्यर्थः निरुक्तसाध्यसमानाधिकरणावृत्तित्वेन च तद्धर्मो विशेषणीयः तेन साध्यविरुद्धधर्मेणातिव्याप्तिरिति लक्ष्यतावच्छेदकं परि
ष्कुर्वंति तदसत् उदस्तत्वादिसमासः उक्तलक्ष्यतावच्छेदकस्यैव लक्षणत्वसंभवेपि येन रूपेण ज्ञातस्योपाधेर्दोषत्वं तादृशं लक्षणमाह लक्षणांति
त्यादित्यादिना पर्यवसितपदार्थमाह यद्धर्मेति यद्धर्मावच्छेदेन यद्धर्मवत्ति साध्यं प्रतिद्वं साध्यं वर्तमानं तदवच्छिन्नसामानाधिकरण्यसंबंधेन ताद
शपक्षं किंचिद्धर्मविशिष्टमित्यर्थः यथाश्रुते अवच्छेदकत्वं नाथान्यूनवृत्तित्वं अन्यूनानतिरिक्तवृत्तित्वं वाभिप्रेतं न यत्वादीनां तदसंभवात् न वा च्च रूपसंबं
धविशेषः अभिप्रेतः न पत्वादीनां तथात्वे मानाभावादिसमसंगतत्वापत्तेः अत्र अधिकरणायत्किंचिद्धर्मविशिष्टस्य साध्यस्य पर्यवसितपदार्थत्वं प्रसिद्धा

मू० म० पत्तिरतोधर्मविशेषणीचयाप्रसिद्धांतंनतुलक्षणाघटकंलक्षणांतुसामानाधिकरण्यसंबंधेन यत्किंचिद्धर्मविशिष्टस्यसाध्यस्यव्यापकत्वेसतिसाधनाव्या
पकत्वेवकेचित्तु प्रसिद्धंसिद्धितंएवतत्र पर्यवसितयदार्थतयास्वरूपकथनमितिवदंति धूमवित्साधनमितिकाकूश्यामोमित्रातनयत्वादिसादेरित्यर्थः
अवि[redacted]तद्व्यतवारीतिवायुःवह्निरिदृव्यप्रमयःप्रमेयत्वादित्यादिविस्यर्थःकूचिन्महानसत्वादिइतिधूमवानवन्हेरित्यादाविसर्थः नवतत्रा
ईधनादेरपुद्धसाध्यव्यापकत्व[redacted]स्येवसंभवात अवच्छिन्नसाध्यव्यापकत्वंकुतोऽभ्युपेयमितिवाच्यं अशुद्धसाध्यव्यापकत्वेपिविशिष्टसा
ध्यव्यापकत्वानपायात परंतुअर्थविशेषणतायाविशिष्टव्याप्यतावच्छेदकं भवतुनवेत्यन्यदेतत ननुसामानाधिकरण्यसंबंधेनयत्किंचिद्धर्मविशिष्टस प्र
साध्यव्यापकत्वेसतिसाधनाव्यापकत्वेवक्रियानृधूमादित्यादिसद्धेतावपिसपक्षैकदेशवृत्तिधर्मस्यव्यंजनवत्वादेरुपाधितापसंग महानसत्वाद्यवच्छिन्नव
स्यादिव्यापकत्वादितिचेत अत्रोपाध्यायाः यद्धर्मविशिष्टसाध्यव्यापकत्वंतद्धर्मविशिष्टसाधनाव्यापकत्वस्यविवक्षितत्वादितिचेत अत्रोपाध्यायाः यद्धर्मवि
शिष्टसाध्यव्यापकत्वंतद्धर्मविशिष्टसाधनाव्यापकत्वस्यविवक्षितत्वान्नवैवंवह्निमहानसत्वादिदिग्ससमसंग तंतद्विशिष्टसाधनाव्यापकस्यार्द्धेधनादावसा
वादितिवाच्यं धूमानधिकरणावन्ह्याधिकरणस्यापिमहानसस्यसत्वात् विशिष्टत्वेचसामानाधिकरण्यसंबंधेनत्वेनरूपवान्पृथिवीत्वादित्यादेसनद्धटोम राम०
तिकालीनत्वविशिष्टरूपव्यापकस्यचघटेतद्विशिष्टपृथिवीत्वाव्यापकस्यचघटामत्वस्यनोपाधित्वप्रसंग साध्यप्रहंचसाध्यतावच्छेदकविशिष्टसाध्यपरंतेनयु

णकर्मान्यत्वविशिष्टसत्तावान्प्रमेयत्वादित्यादौ द्रव्यकर्मान्यत्वादिविशिष्टसत्ताया व्यापकतादृशप्रमेयत्वाव्यापकेचगुणत्वादौनातिव्याप्तिसाधनपदमपिसा
ध्यतावच्छेदकविशिष्टसाधनपरंतेनद्रव्यंगुणान्यत्वविशिष्टसत्त्वादित्यादौद्रव्यगुणान्यतरत्वविशिष्टद्रव्यत्वव्याप्यव्यापकतादृशशुद्धसत्तायाः अव्या
पकेचगुणान्यत्वेनातिव्याप्तिः इदंगुरुत्वादित्यादौ पृथिवीत्वाभावादिविरूपवान्द्रव्यत्वात्महाकालान्यो घटादित्यादावपिपृथिवीत्वाभाववत्वंकालभेदा
दिनंलक्षणे इति न तत्राव्याप्तिरिति प्राहुः रूपवान्द्रव्यत्वादित्यादौपृथिवीत्वाभावादेर्लक्षणत्वेतुयद्धर्मावच्छेदेदंतत्रसप्तमीयद्धर्मविशिष्टेऽन्यर्थःसाधनाधि
करणत्वविशेषणंशेषस्यनिषेधार्थकःप्रसिद्धंवर्तमानंतथाचासाध्यानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकतावच्छेदकत्वेसतिसाध
नाव्यापकतावच्छेदकोयोधर्मस्तद्वत्त्वमुपाधित्वमितिफलितेविशिष्टसाध्यव्यापकोपाधावव्याप्तिवारणायसम्पादच्छिन्नांतंसाध्यविशेषणंरूपवान्द्रव्यत्वा
दित्यादौसाध्यानधिकरणंसाधनाधिकरणंवाघटादितद्वृत्तिधर्मोवायुजलान्यतरत्वादिस्तदवच्छिन्नसाध्यव्यापकत्वंपृथिवीत्वाभावादेरितितत्रापि
लक्षणसमन्वयः यत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वस्यसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वस्याभिधानेवह्निमान्धूमादित्यादिसद्धेतावच्छे
प्रसिद्धमतोनतद्दोषतादवस्थ्यं महानसत्वादेरपिमहानसजलह्रदान्यतरत्वादिविशिष्टसाध्यव्यापकतयातद्दोषतादवस्थ्यवारणायसाधनाधिकरणत्वप्रवेशःसाध
नाधिकरणत्वंचसाधनतावच्छेदकविशिष्टाधिकरणत्वंतेनद्रव्यंगुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्रसाध्यानधिकरणसत्ताधिकरणवृत्तिरूपघटान्यतरत्वावच्छिन्नसा

मु० म० ध्यव्यापके पृथिवीत्वादौ नातिव्याप्तिः साध्यानधिकरणसाधनतावच्छेदकविशिष्टसाध्यानाधिकरणाप्रसिद्धेः साध्यानधिकरणत्वमपि साध्यतावच्छेदकविशिष्टा
नधिकरणत्वं तेनु यौ न गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र सत्तानधिकरणजात्यधिकरणाप्रसिद्धावपि द्रव्यत्वादौ नाव्याप्तिः नचैवमुपाधिशरीर एवं सा
ध्यव्यभिचारभानादुपाधिव्यभिचारेण पुनर्व्यभिचारानुमानमफलं स्यादिति वाच्यं हेतुविशेष्यकसाध्यव्यभिचारप्रकारकज्ञानार्थं तस्यानुमानस्यावश्यकत्वा
त्तादृशज्ञानस्यैव प्रतिबंधकत्वात् यत्रोपाधित्वज्ञानात्पदं साधनाधिकरणस्य न साध्यानधिकरणत्वज्ञानं तत्र निश्चितोपाधित्वाभावस्याभीष्टत्वात् साध्यव्या
पकत्वमपि साध्यतावच्छेदकविशिष्टसाध्यव्यापकत्वं बोध्यं अन्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र द्रव्यत्वादावव्याप्त्यापत्तेः तत्र द्रव्यगुणान्यतरत्वद्रव्य
कर्मान्यतरत्वादिरूपतादृशधर्मावच्छिन्नविशिष्टसत्ताव्यापकत्वसत्त्वेपि तादृशानुगतसत्ताव्यापकत्वविरहात् नच निरुक्तसाध्यानधिकरणानिरुक्तसाधनाधिकर
णावृत्तिधर्मावच्छिन्ननिरुक्तसाध्यसमानाधिकरणधर्मावच्छिन्नत्वे सतीत्येवास्तु किं व्यापकतावच्छेदकत्वपर्यन्तानुधावनेन तादृशसाध्यसमानाधिकरणवृत्ति
त्वांशसाध्याधिकरणानिरूपिताधेयतावच्छेदकं तत्तेन द्रव्यं सत्त्वादित्यत्र द्रव्यान्यत्वविशिष्टसत्त्वे नातिव्याप्तिरिति वाच्यं व्यापकताप्रवेशे उपाधिशरीरे भानस्यापा
धिव्यभिचारित्वनिष्ठसाध्यव्यभिचारित्वव्याप्तिग्रहोपयोगित्वासंभवात् यत्रासन्निवेशे वैयर्थ्याभावात् धूमवान् वह्नेरित्यादौ साधनव्यापकस्य प्रमेयत्वादेर्वारणाय राम०
साधनव्यापकतावच्छेदकत्वप्रवेशे साधनपदं च साध्यतावच्छेदकावच्छिन्नपरं तेन द्रव्यं गुणान्यत्वविशिष्टसत्त्वादित्यत्र द्रव्यकर्मान्यतरत्वादिरूपतादृशधर्मावच्छिन्नसा

व्यापकेऽनुगतत्वेनातिव्याप्तिर्न चैवमिदं गुरुत्वादिसादावपि जलतेजोऽन्यतरत्वादिरूपताहशधर्मे विशिष्टसाध्यव्यापकतया पृथिवीत्वेतिरूपाव्यापकतया पृथि
वीत्वाभावादेरुपाधितापत्तिः पृथिवीत्वाभावव्यभिचारिरूपव्यक्तेः पृथिवीमात्रनिष्ठतया साध्यव्यभिचारित्वाभावात्तत्र तदनुपाधित्वस्य सर्वसंमतत्वादिति वाच्यं पृ
थिव्यां प्रविष्टापा साधनव्यक्तिः साधनतावच्छेदकविशिष्टतत्साधनव्यक्तिव्यापकत्वस्य विवक्षितत्वात् द्रव्यत्वाभावाद्यात्मत्वादिसमवस्थाभाववद्वृत्तित्वरूपत्वस्य व्य
भिचारित्वेन साध्यव्यभिचारानुमानसमर्थोपि संयोगाभावादिर्नसिद्धास्त्विः तेनोपाध्याप्यमतेऽपि मतेऽपि तत्र ग्राह्याणि रीतिसमास प्रसंगादिदानीमुपाधिव्यभिचारेणासा
ध्यव्यभिचारानुमितिप्रकारं व्युत्पादयंति तथा हीति साध्यव्यभिचारी साध्यव्यभिचारग्रहः स्फुटएव स्फुटं तरं संभवत्येव व्यभिचारित्वेन व्यभिचारित्वेनापि साध्यव्यभि
चारित्वेमेव साधनस्य साध्यव्यभिचारित्वग्रहः संभवत्येव ननु विशिष्टसाध्यव्यापकव्यभिचारित्वेन विशिष्टसाध्यव्यभिचारग्रहएव संभवति न तु शुद्धसाध्यव्यभिचारग्रह
इत्यत आह विशेष्येति विशेष्यव्यभिचारित्वरूपतानियमादित्यर्थः न च विशिष्टाभावविशेष्याभावयोर्भेदेन व्यभिचारस्य दात्तत्कथं विशिष्टव्यभिचारो विशेष्यव्यभिचाराते
ति वाच्यं विशिष्टाभावो विशेष्यविशेषणाभावाभ्यां नातिरिच्यत इत्यभिप्रायात् विशिष्टाभावस्यातिरिक्तत्वेपि विशेष्याभावाधिकरणस्य विशिष्टाभावाधिकरणत्वनि
यमेन विशेष्याभावाधिकरणवृत्तित्वविशिष्टाभावाधिकरणवृत्तित्वरूपत्वाच्च अतएवेति यतो विशेषणाव्यभिचारित्वात् साधने विशिष्टसाध्यव्यभिचारो विशेष्यी [illegible]
साध्यव्यभिचारस्वरूपोऽन्यएवेत्यर्थः नार्थान्तरमिति वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादावुद्भूतरूपवत्त्वव्यभिचारित्वग्रहस्य बाधग्रहत्वकारादित्यर्थः विशेषणाव्यभिचारित्वे

३६

मू० म० साधनेविशिष्टसाध्यव्यभिचारस्य विशेष्यीभूतशुद्धसाध्यव्यभिचाररूपत्वेन विशेष्यीभूतशुद्धसाध्यव्यभिचारस्यापि व्यापकतावच्छेदकावच्छिन्नत्वादिति भावः न चैतस्य
व्यापकतावच्छेदकावच्छिन्नत्वेपि अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमाद्विशिष्टसाध्यव्यभिचारत्वप्रकारिकैव धीः स्यात् तथा चार्थांतरमेव शुद्धसाध्यव्यभिचा
रत्वप्रकारकबुद्धेरेवकारणीभूतव्याप्तिज्ञानप्रतिबंधकत्वेनोद्देश्यत्वादिति वाच्यं इतरकोटिबाधग्रहसहकारेणाव्यापकतानवच्छेदकरूपेणापि व्यापकतावच्छेदकावच्छिन्ना
नुमितिस्वीकारात् अन्यथा विशेष्यव्यभिचारित्वाविषयकत्वेऽपर्यवसानात् अपर्यवसानप्रसंगात् अप्रमात्वप्रसंगादिति भावः विशेषणव्यभिचारित्वस्य चान्व
यितत्वादिति भावः ननु तथापि अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमे पक्षधर्मतावलादपि शुद्धसाध्यव्यभिचारत्वप्रकारिकाधीर्न संभवतीति स्वरसादाह यद्वे
ति द्रव्यप्रमेयत्वेति द्रव्यत्वावच्छिन्नप्रत्यक्षत्वे सत्यर्थः महत्त्ववत् चक्षुरादिनिष्ठमहत्त्ववत् तेन घटादिवृत्तिमहत्त्वस्य साध्यसाधानविकलत्वेपि न क्षतिः इदं चानुमानं प्रत्यक्ष
परिमाणवत्त्वाद्व्याप्यव्यभिप्रायेण न तत्स्वरूपयत्नोपाध्यभिप्रायेण तस्मान्न व्यभिचारेण द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाव्यापकत्वात् तद्व्यभिचारित्वस्य स्फुटत्वादेव प्रत्यक्षमहत्त्वव्य
भिचारित्वस्यैव व्यभिचाराच्चेति इत्थं नच द्रव्यप्रमेयत्वव्यापकत्वे सत्र द्रव्यपदवैयर्थ्यमिति वाच्यं प्रत्यक्षपरिमाणवत्त्वादिव्यभिचारित्वस्यैव हेतुत्वात् द्रव्यप्रमेयत्वव्याप
कत्वोपन्यासस्तु तर्कप्रदर्शनायेति श्याममित्रातनयत्वेति मित्रातनयत्वावच्छिन्नश्यामत्वे सत्यर्थः अत्रापि शाकपाकजत्वव्यभिचारित्वादिमेव हेतुव्यापकत्वेयन्यासस्तु तर्क रामः
प्रदर्शनायेति ध्येयं अथ घटत्वादिति न च घटत्वे भेदः स तु नान्वये न दृष्टांतः स समंत विशेषणाभावे न साधनविकलत्वात् नापि व्यतिरेकेण साध्यस्य तत्र सत्त्वादिति चेन्न्वास्म

स्व
मित्त्वरणाय यथाहि धूमविशिष्टप्रमेयत्वं वह्न्यव्यभिचारितथामित्रातनयत्वादिविशिष्टं सत् अघटस्यपि मित्रातनयत्वाव्यभिचारयेदेवेति भावः ननु मित्रातनयत्वाव्यभि
चारित्वं मित्रातनयत्वाभाववद्वृत्तित्वं तच्च मित्रातनयत्वविशिष्टे घटत्वेपि नास्ति विशिष्टस्यानतिरिक्ततया गुणाद्यन्यत्वविशिष्टसत्ताया गुणादिवृत्तित्ववन्मित्रातनय
त्वादिविशिष्टघटत्वस्यापि मित्रातनयभिन्नेसत्वात् वह्न्यभाववद्वृत्तित्वरूपवह्न्यव्यभिचारित्वमपि धूमविशिष्टप्रमेयत्वे तथा च साधनविकलो दृष्टांत इत्यतो
व्यापकत्वरूपमव्यभिचारित्वं विवक्षितं अव्यभिचारश्चेति तत्सामानाधिकरण्येति तत मित्रातनयत्वसमानाधिकरणात्यंताभावाप्रतियोगित्वस्येति हृदि हि स्वस
मानाधिकरणात्यंताभावाप्रतियोगी मित्रातनयत्वमित्यर्थः यथाश्रुते मित्रातनयव्यापकत्वस्यैव फलतो मित्रातनयत्वाव्यभिचारित्वरूपत्वेन तथा शाकपाकजत्वव्यभिचारि
त्वरूपस्य विशेष्यदलस्यैवेयर्थ्यापत्ते दुर्वारत्वात् मित्रातनयत्वव्यापकत्वे सति वर्तमानत्वादिमत्त्वस्यैव सम्यक्त्वात् अभेदेप विशिष्टस्य केवलादनतिरिक्तत्वेपीत्यर्थः वि
शिष्टस्यानतिरिक्तत्वेपि तन्निरूपिताधारताया मित्रातनयत्वे भावादिति भावः एवं च श्यामत्व मित्रातनयत्वप्रकारकप्रमाविशेष्यताभावादेवाव्यभिचार तस्यापि
मित्रातनयत्वादिविशिष्टीभूतमित्रातनयत्वाव्यभिचारित्वात् शाकपाकजत्वाभाववद्वृत्तित्वरूपशाकपाकजत्वव्यभिचारित्वाच्च तथापि शाकपाकजत्वाव्यभिचारित्वं स्वसमाना
धिकरणात्यंताभावप्रतियोगि शाकपाकजत्वकत्वं तथा च स्वसमानाधिकरणात्यंताभावाप्रतियोगि मित्रातनयत्वकत्वकत्वेति स्वसमानाधिकरणात्यंताभावप्रतियोगि
शाकपाकजत्वकमिति फलितं स्वपदद्वयं च एकधर्मावच्छिन्नबोधकमतो न कोपि दोष इत्याहुः नव्यास्तु अघटत्वव्यतिरेकेणैव दृष्टांतः मित्रातनयत्वस्य मित्रातनयत्वविशिष्टघ

मू० म० ख्यावयवविशेषरूपस्यसमवेतत्वसंबंधेनैवस्याप्यानुमानहेतुकतयासमवेतत्वसंबंधेनश्यामत्वव्यभिचारस्यैवात्रसाध्यत्वेनसाध्याभावस्यापितत्रसत्वात्‌यदिवाभि
त्रातनयत्वंप्रकृतेमित्राजन्यतावच्छेदकधर्मावत्वमात्रंनाधिकंव्यर्थत्वात्‌तदापितादृशधर्मस्यजातिविशेषरूपतयासमवायसंबंधेनश्यामत्वव्यभिचारस्यैवात्र
साध्यत्वेनसाध्याभावस्यतुतरांतत्रसत्वादितिभावःननुमित्रातनयत्वाव्यभिचारित्वंकुतोमित्रातनयत्वेऽव्यभिचारस्यभेदगर्भ--इतोहेतुःस्वरूपासिद्धइत्यत
आह अयंतत्वभेदेपिभेदगर्भत्वादितिभावइतिप्राहुःमीमांसकाः अघटइतिगौरमित्रातनयस्यसंज्ञाभेदःतथागौरमित्रातनयवृत्तिधर्मोऽन्ययेनैवदृष्टांतएसा
ध्यंतन्मतेऽव्यभिचारस्यैवसाध्यंयस्तुनव्यमतयोजनीयःभट्टाचार्यास्तु नन्वघटत्वंघटभेदःस्वचनान्वयेनदृष्टांतःसाधनविकलत्वात्‌ अधिकरणभेदेनघटभेदाभा
वात्‌नापिव्यतिरेकेणामित्रातनयत्वंनमित्रा॰तनयत्वावच्छेदकधर्मवत्वमात्रंतस्यतनयत्वात्‌ अतएवनमित्राजन्यत्वविशिष्टपुंस्त्वाख्यावयवविशेषघटनाव्यां
पेक्षनियामकसंबंधस्यशक्यतावच्छेदकतयातस्यापितनयत्वादपितुमित्राजन्यत्वविशिष्टपुंस्त्वाख्यावयवविशेषसमवेतत्वंछिन्नलिंगखंडशरीरंतुनपुंसकत्व
त्वेनपुत्रंतथाचस्वरूपसंबंधेनैवनत्रस्यापमानानुमानेहेतुतयास्वरूपसंबंधेनश्यामत्वव्यभिचारित्वस्यैवात्रसाध्यत्वेनाघटत्वेसाध्याभावविरहादित्याशंकापामोवार
अव्याभिचारश्चेतितत्समानाधिकरणेतिमित्रातनयत्वाधिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठेत्यर्थःतेनमित्रातनयत्वसमानाधिकरणत्वंफलितंयथाश्रुतेहेतावुक्तरीत्या राम०
अर्थविशेषणतापत्तेःतच्चेतिअभेदेतिघटभेदस्याधिकरणभेदेनभेदाभावेपितत्रापातिशेषनचैवंस्यामत्वादावेवव्यभिचारतस्यापिमित्रातनयत्वसमानाधिकरणत्वात्‌

त् शाकपाकजत्वव्यभिचारित्वाद्वेति वाच्यं यस्मिन्नधिकरणे मित्रातनयत्वसमानाधिकरणं तत्र शाकपाकजत्वव्यभिचारित्वस्य विवक्षितत्वात् मित्रातनये शा
कपाकजत्वव्यभिचारित्वादिति फलितार्थ इत्याहुः ननु एवं साध्यव्यभिचारानुमापकत्वेनोपाधिव्यभिचारस्यैव दोषतया स एवोपन्यस्तुमुचितो नोपाधिरिति
प्रागुक्तदोषो दुर्वार इत्यस्वरसादाह यद्वेति यत्साधनव्यभिचारीति यः साधनव्यभिचारी उपाधिः साध्यव्यभिचारोन्नायकः स स्वयमेव साधने साध्यव्य
भिचारोन्नायक इति योजना स्वरूपसंबंधेन तद्व्यभिचारस्यैव तस्यापि व्यभिचारितासंबंधेन साधवृत्तित्वात् साध्यव्यभिचारव्याप्यत्वाच्च तथा च वह्निधूमव्य
भिचारी आर्द्रेंधनवत्वादिस्तादिरेवं व्यभिचारानुमानप्रयोगः न च व्यभिचारित्वादिसंबंधस्य स्वरूपनियामकत्वयानव्याप्यतावच्छेदकत्वासंभवे व्याप्यतावच्छेद
कत्वे वाधकाभावादिह हेतावुपाधिरिति प्रतीतिः साध्यव्यभिचारितासंबंधस्यापि वृत्तिनियामकत्वाच्चेति भावः कुरक्ता पृथिवीकृष्णासंयोगवत्वादित्यादौ साधनव्या
पकत्वस्यानुपस्थाशीतस्पर्शवत्वाद्युपाधेर्विशेषदर्शिनो साधने साध्यव्यभिचारानुमापकत्वासंभवाद्व्यभिचारोत्रैतमुपाधिविशेषणां साधनं व्यभिचारि यस्येति यु
क्तस्य साध्यनाव्यापकत्वं तदर्थं तत्वं चेति विशिष्टसाध्यव्यापकोपाधेस्तत्वं अस्मर्थं साक्षात् प्रागुक्तरीत्याविशेषणाव्यभिचारित्वादिविशेषणासहकारेण सा
ध्यान्तरपरया वा इत्येवपक्षयंथोक्रमेणाप्युक्तसाध्यव्यभिचारानुमापकविशिष्टसाध्यव्यभिचारानुमिति - रेवं वानार्थांतरमिति धूमो विनाशी जन्यत्वादित्यादौ वि
शिष्टसाध्यव्यापकभावत्वाद्युपाधेस्साधनव्याप्तिकारनार्थांतरमित्यर्थः न च तथापि परंपरयैवेति पक्षे समयं तु दुष्प्रापनेऽप्रामाण्यस्येवान्यथा उपाधिसाधनसाधकादिपर

मू॰म॰

परायात्र्प्युत्पादनेऽपा समकालत्वं नस्यादिति वाच्यं प्रथमं मुद्रसाध्याव्यभिचारस्य बोध्यास्यः तत्तदवच्छेदकत्वं तद्धेतुत्वेन विशेषणाव्यभिचारित्वमिति विशिष्टसाध्याव्यभिचारित्वमुक्तत्वं
तत्र विशेष्ये कथंतायां तद्धेतुत्वेनाविशिष्टसाध्यव्यापकोपाधिरूपाव्यस्य समानकालविरहात् न च तथापि समानत्वात् प्युद्रसाध्याव्यभिचारानुमापकत्वाद्विशिष्टसाध्यव्यापको
पाधेर्दोषत्वं नस्यादिति वाच्यं साक्षात्परंपरासाधारणाव्यभिचारानुमापकत्वस्यैव दोषतायां तंत्रत्वादिति भावः केचित्तु पक्षांतरेणाव्याप्यतावच्छेदकं निर्वक्ति यद्धति
यः साधनव्यभिचारी साधननिष्ठो यद्व्यभिचारः साध्याव्यभिचारित्वाद्यकः साध्याव्यभिचारानुमितिस्वरूपयोग्यः साध्याव्यभिचारसमानाधिकरण इति यावत् सउपा
धिरित्यर्थः इत्थं च पृथिवीत्वादिना हि सद्धेतौ साध्यव्यापकस्य गुणवत्त्वादेः साध्यव्याप्यस्य घटत्वादेश्चोपाधितावारणाय दुष्टत्वं तद्व्यभिचारविशेषणं तथा च सा
धनतावच्छेदकावच्छिन्नसाधनाधिकरणावृत्तित्वविशिष्टयद्धर्मावच्छिन्नाव्यभिचारित्वनिरूपिताधिकरणत्वं साध्यव्यभिचारसमानाधिकरणं तद्धर्मवत्त्वमुपाधित्व
मिति फलितं तेन स्वविशिष्टसत्त्वादिना दोषविशिष्टस्यानतिरिक्तत्वेपि गुणवत्त्वादेर्नातिव्याप्तिः न च व्याप्यपक्षे देयोपकसंबंधावच्छिन्नाव्यभिचारी तस्य एकत्वेन यदुव्य
पृथिवीत्वादिना हेतुघटत्वादावतिव्याप्तिः स्वस्य पृथिवीत्वाधिकरणावृत्तिविशिष्टत्वव्यभिचारित्वस्य समानाधिकरणत्वं तेपि पृथिवीत्वाधिकरणावृत्तिविशिष्टट
त्वव्यभिचारित्वनिरूपिताधिकरणत्वस्य पृथिवीत्वाधिकरणत्वस्यैव सत्त्वात् तेन साध्यस्य विशिष्टसाध्यव्यापकोपाधावव्याप्यापत्तेः तद्व्यभिचारस्य साधनाधिकरणत्व राम०
निष्ठत्वेपि साध्याव्यभिचाराव्याप्यत्वात् आद्यपक्षे हेतव्यभिचारभेदाभावात् एवं च विरक्तसाध्यसामानाधिकरण्येनापि तद्धर्मो विशेषणीयस्तेन धूमवान्वह्नेरित्यादौ साध्यविर

ेजसत्वादौ नातिव्याप्तिः उक्तैर्विशेषणैः सर्वस्मान् रूपवान् द्रव्यत्वात् इत्यत्र रूपादिसाध्ये पृथिवीत्वाभावघटत्वाभावादावतिव्याप्तिवारणायानुपूर्ववत् तत्त्ववदेति अभि
चारानुमितिपक्षव्यापकत्वं चेत्यर्थः साक्षात्परंपरया चेति शुद्धसाध्यव्यापकस्य तेसा साक्षाद्विशिष्टसाध्यव्यापकस्यैव पूर्वप्रोक्तक्रमेणाशुद्धसाध्याभिचारानुमा
पकी विशिष्टसाध्यव्यापकोपाधिभ्रमादनेनार्थांतरमित्यर्थः एतच्च प्रसंगात्स्वरूपकथनं न तु लक्षणतावच्छेदेनाह किंचेति पुरुषदोषत्वादिति उद्भावकस्य पुरुष ति४
स्यापि ग्रहस्यानमात्रत्वादित्यर्थः मात्रपदात् दुष्टादिलिंगकव्यभिचारानुमितिप्रतिबंधकत्वव्यवच्छेदः अत्र भासांतरस्य व्यभिचारानुमितिप्रकारांतरस्य तत्र व्यभिचा
रानुमितिपूर्वदशायां उपाधिरेवेति ध्वंसाविनाशीजन्यत्वादित्यादौ भावत्वादिकमुपाधिर्दोषत्वेवेति योजना तेनापि परंपरया व्यभिचारानुमितिनिवर्तिपरोक्तसाध्य
सिद्धिप्रतिबंधकस्योद्भूतस्य निर्वाहादिति भावः नचैवमिति एवं पक्षावच्छिन्नसाध्यव्यापकत्वस्यापि दोषताप्रयोजकत्वे अश्रावणत्वमिति तत्र पक्षधर्मगुणत्वावच्छिन्नसा
ध्यव्यापकत्वाज्ञानसंभवादिति भावः पृथिवीत्वमिति पक्षधर्मरसत्वावच्छिन्नसाध्यव्यापकताज्ञानसंभवादिति भावः उपाधिः स्यात् दोषः स्यात् तत्र शब्दजलयोः वि
शिष्टाव्यापकत्वादिति पक्षधर्मगुणत्वावच्छिन्नसाध्यव्यापकतादिति भावः स्वव्याघातकत्वेनेति उपाधिमात्रस्य दूषकत्वव्याघातकत्वेनेत्यर्थः पक्षेतरस्योपाधित्वे
सर्वत्रैव तादृशोपाधिसंभवेनानुमानमात्रोच्छेदे व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वासंभवादिति भावः अतिव्याप्तिः उक्तरूपतानस्य दोषत्वापत्तौ दूषकता
यदवच्छिन्नसाध्यव्यापकत्वं तदवच्छिन्नसाधनाव्यापकत्वज्ञानस्यात्रापि संभवादिति भावः साध्यव्यापकत्वानिश्चयादिति यद्धर्मावच्छिन्नसाधनाव्यापकत्वं त

स०म० धूमावच्छिन्नसाध्यव्यापकतानिश्चयादिरर्थः परंतु तन्निश्चयो भवतितरां वाधोन्नीतपक्षेतरनिश्चय इव तन्निश्चयो भवत्येवेति न दोष इति भावः संशापकत्वात्व्यभिचारसंश
याधायकत्वात् अनुकूलतर्कोऽस्तीति वेति उपाध्यभाववति पक्षसाध्याभावस्य पक्षे व्यभिचारसंशयप्रतिबंधकत्वेनानुकूलतर्कत्वादिति भावः नोपाधित्वं नोपाधिकरणा
त्वनिश्चयः पक्षमात्रेति यद्यपि पर्वतावयवरूपादेरपि आवर्त्तनात्र यक्षमात्रव्यावर्त्तकविशेषणावत्त्वं नवा तद्वत्त्वं उपाधित्वानिश्चये प्रयोजकं तथापि तु स्वार्थक
वतिपसपोभरप्रसयोः तपक्षमात्रव्यावर्त्तकं विशेषणं यत्र पक्षेतत्तुल्यत्वादिरर्थः तथा च तत्र यथानुकूलतर्काभावेन तादृशव्यापकतानिश्चयः तस्याप्यपीतिभा
वः अत एव वेति व्यापकताग्राहकानुकूलतर्कसत्वादेवेमर्थ उपाधिः उपाधित्वेन निश्चितः यथासंख्यमनुकूलतर्कमाह तदुत्कर्षेणोयोति आर्द्रेंधनप्रभववह्नेर्तत्वे
राधूमोत्कर्षादिरर्थ इति वेतर्कमाह अनन्यथेति द्रव्यवह्नित्वं द्विपप्रसक्षंप्रति ऽभूतरूपस्यानन्यथासिद्धत्वप्रमतिकादि। सर्थः तृतीयेतर्कमाह वेद्यकादिति वेद्य
केन स्यामत्वं प्रतिशाकपाकस्य जनकत्वकथनादिति भावः कारणतावगमेनेति भावः आर्द्रेंधनप्रभववह्न्यादिर्नाधूमादिकं प्रतिकारणतानिश्चयेनेत्यर्थः चतुर्थेतर्क
माह घटेति ध्वंसस्यापि ध्वंसे प्रतियोगिनो घटस्य पुनः परावृत्तिप्रसंगेनेत्यर्थः ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमादिति भावः इदमापातत
प्रतियोगिनो ध्वंसो विषयथाप्रागभावस्य ध्वंसः तथा ध्वंसस्य ध्वंसोपि प्रतियोगिनो ध्वंस इत्युक्तावेवघयेनजनप्रसंगवारणासंभवात्तव स्वतंत्रत्वे अप्रामाणिकानंतध्वंसप्र
तियोगिनिष्टतत्कारणत्वकल्पनामपस्य ध्वंसानंतत्वकल्पनैव लघीयसीति साघवमेवानुकूलतर्क इति तत्त्वं कार्यकारणयोः कार्यकारणभावग्राहकप्रमाणविषयीभू राम०

तयोःयधीष्ठतेअप्रस्तुस्यापि शाकपाकजत्वादेर्व्यापकत्वकथनात् शंकानुपपत्तेः बहुव्याकुलीति जलत्वादिना द्रव्यत्वाद्यनुमाने न स्यादित्यर्थः तदुपजीव्येति तत्कार्य
कारणाभावाज्ञानमुपजीव्येत्यर्थः द्रव्यत्वजलत्वादिस्थलेऽपि जलत्वं द्रव्यत्वव्यभिचारी स्यात् संयोगव्यभिचारिस्यात् तु संगतावच्छिन्नं प्रति द्रव्यत्वेन न समवायिकारणत्वादि
ति परंपरया संयोगत्वावच्छिन्नं द्रव्यत्वावच्छिन्नकार्यकारणभावग्रहोपजीवी तर्क एव व्याप्तिग्राहक इति भावः नन्वेवं यत्रैव हेतुसाध्ययोः साध्योपाध्योश्च सहचा
रदर्शनव्यभिचारानिश्चयमात्रं व्याप्तिग्राहकं वर्त्तते नानुकूलतर्कः तत्रोपाधौ साध्यव्यापकत्वानिश्चयादुपाधित्वज्ञानं दोषो न स्यादित्यत आह यत्रैवेति तत्र संदिग्धो
पाधित्वमिति तत्रोपाधित्वं उपाधौ साध्यव्यापकत्वमित्यर्थः यत्र हेतौ तर्कावतारस्तत्र हेतौ साध्यव्याप्यत्वनिश्चयः यत्र साध्ये तर्कावतारस्तत्र उपाधौ साध्यव्यापक
त्वनिश्चय इति भावः नन्वेवं पक्षेतरस्योपाधित्वनिर्णयाभावेऽप्युपाधित्वसंदेहो दोषः स्यादित्यत आह पक्षेतरस्येति स्वव्याघातकत्वेनोपाधिमात्रस्य दूषकताया धीतप्र
संगेन संदिग्धोपाधिरपि सः तस्योपाधित्वसंदेहोऽपि न दोषः इत्याशयात् ततः उपाध्यंतरस्य उपाधित्वसंदेहवत् पक्षेतरस्योपाधित्वसंदेहेनापि व्यभिचारसंशयजनने बाधकाभा
वात् न हि प्रयोजनसत्ताभिन्नसामग्री कार्यं न यति न वा प्रजयानसतिः यदा यथाकथंचित्वव्यनुकूलतर्केण पक्षेतरे साध्यव्यापकत्वं निश्चितं तदनुकूलतर्कात् पक्षेतरत्वव्य
भिचारित्वे साध्यव्यभिचारित्वमप्यत्वनिश्चयोगात् तस्यैव व्यभिचारानुमाने पक्षेतरस्योपाधित्वसंशयासंभवेन व्यभिचारानुमानसंभवात् न च पक्षेतरस्योपाधित्वसंदेहाद्धि
तव्यभिचारसंशयात्पक्षेऽपि व्यभिचारसंशय एव प्रतिबंधक इति वाच्यं न हि व्यभिचारज्ञानत्वेन प्रतिबंधकता मते पक्षेतरत्वविशिष्टोपाधिवृत्तित्वज्ञानाजन्यत्वं पक्षेऽपि व्यभिचा

मु० म०

रसंशयामत्वं वा प्रतिबंधकतावच्छेदकेनुमविशेतगौरवात्मानाभाच्च वक्तविशेषादर्शनदशायां उपाधौ तत्रसाउपाधित्वसंदेहवत् पक्षापक्षेतररसोपाधित्वसंदेहस्तत्रापि
व्याप्तिग्रहोनभवत्येव परं तु कृपकृसंप्रदायानुरोधात्कथायां संदिग्धोपाधित्वेनोद्भाव्यते इत्येव तत्त्वं साध्याव्यापकतापक्षामात्रसंब्ध साध्यव्यापककोटिमात्रसंशयसाध्य
व्यापकताकोटिसंदेहविषयीभवेति यावत् दूषणं स्यादेवेति यदिमदुक्तं गतेर्नानुसारणीयेतिभावः पक्षोपाधिः पक्षोपाधित्वज्ञानं दीघ्रः स्यात् साध्यव्याप्येति साध्यव्याप्य
व्यापकत्वज्ञानेनसमर्थः अनुकूलतर्केणहेतौ साध्यव्याप्यत्वनिश्चयादितिभावः नोपाधिनोपाधित्वज्ञानं नोपाधिदूषणतां नोपाधित्वज्ञानदूषणां शंकते व्याप्त्यभावेति
उभयमिति उपाधिरनुकूलतर्काभावप्रयोजनार्थः तदभावो न यत्नेन व्याप्त्यभावो न यत्नेन व्याप्तत्वाभावार्थमिति साध्यव्यापकताज्ञानार्थमित्यर्थः हेतौ साध्यव्याप्तिग्राहका
नुकूलतर्कसत्वे तत्र साध्याव्यापकत्वनिश्चयात्तद्व्यापकत्वज्ञानेन साध्यव्यापकज्ञानं न स्यादिति भावः सोपाधाविति साध्यतदभावसहचरितत्वसोपाधाविति सर्थः एकत्रेति अ
वच्छेदकभेदं विनेति शेषः उपाधीरत्वरूपं वाच्यमिति सामानाधिकरण्यसंसर्गेणोपाधिवत्त्वरूपं वाच्यमित्यर्थः एकव्यक्तिरूपविभिवादिहेतुस्थले सामानाधिकरण्यसंसर्गेणोपाधेरव
च्छेदकत्वं विना ग्रस्याव्यवच्छेदकतापत्तेर्वह्निमत्वात् धूमवान् वह्नेरित्यादौ चैकव्यक्तिः साध्यतदभावसमानाधिकरणान च इदं सत्त्वादित्यादावपि विशिष्टसत्तावाइयवृत्तिवा
दिकमेवावच्छेदकं भविष्यतीतिवाच्यं सामानाधिकरण्यसंसर्गेण गुणाद्यमत्व इत्यबाधापत्ते स्यात् तस्य गुरुरूपत्वात्न च घटत्वादिकमेव सामानाधिकरण्यसंसर्गेणावच्छेद राम०
कं भविष्यतीतिवाच्यं सामानाधिकरण्यसंसर्गेण तद्विशिष्टस्य साधतत्स्य साध्यनूनवृत्तित्वादितिभावः व्यावर्त्यपक्ष इति तद्विनासाध्यव्यापकत्वज्ञानासंभवादितिभावः विभिगम

काभावादिति इत्यापाततः साध्यसंबंधितावच्छेदकत्वेनोपाधित्वरूपस्यावश्यकत्वेपि तस्योपाधित्वज्ञानं कथं दोषस्तस्मात् उपजीव्यत्वेनानुकूलतर्काभावस्यैव दोषत्वसंभ
वात् वस्तुतस्तु उपाधित्वज्ञानानुकूलतर्काभावयोरुपजीव्योपजीवकभावो न कार्यकारणभावः असंभवात् न वा व्याप्यव्यापकभावः तस्य प्रतिबंधकतायामविनिगम
कत्वात् तद्धेतोरेवेति न्यायस्य कारणतायामेवाविनिगमकत्वात् ग्राह्यतायामेवाविनिगमकत्वात्। एवं निधर्मावच्छिन्नसाध्याभावव्याप्यः पक्षतावच्छेदकावच्छेदेन वर्तमान
स्तद्धर्मावच्छिन्नत्वमुपाधित्वमिति फलितं साधु मुख्यप्रमाणं तं साध्यविशेषणां पर्वतो धूमवान् वन्हेरित्यादौ अतिव्याप्त्यापत्तेः विद्धर्मेति विहाय वृत्तिधर्मो न निहितं न
च तथाप्ययोगोलकं धूमवन्न वन्हेरित्यादौ महानसत्वादावतिव्याप्तिः तदभावव्याप्यमहानसायोगोलकान्यतरत्वादिरूपपक्षवृत्तिधर्मावच्छिन्नसाध्याभावव्याप्यत्वादिति
वाच्यं तन्नस्पष्टत्वात् महानसायोगोलकान्यतरत्वादिरूपपक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमात्रस्य मासाद्यलक्षणाक्रांतत्वात् सर्वे साध्य
समानाधिकरणाः सदुपाधयः पक्षे सर्वाश्रये येषां स्वसाध्यव्यभिचारितेति सिद्धांतात् पक्षे सर्वाश्रयेपरूपे सर्वाश्रये सर्वस्मिन् पक्षतावच्छेदकाश्रय इति भावः तत् पक्ष
तावच्छेदकावच्छेदेन वर्त्तमानत्वोपादानात् पर्वतो वन्हिमान् धूमात् इत्यत्र वन्हिमत्धूमादिसाधने वन्हिसामग्र्यादेरुदासः उद्देवन्हिमान्धूमादित्यादौ वन्हिसामग्र्यादिष्वसंग्रा
ह एव समग्रति पक्षोत्रायकत्वेन दूषकतामते साधनव्यापकस्यापि पक्षावृत्तेरुपाधित्वात् अबाधितसाध्यकस्य लीयोपाधिष्वसंग्रहः इति पर्वतो धूमवान् वन्हेरित्यादावार्द्रेंधना
दौ नाव्याप्तिरिति भावः न चैवं यद्धर्मावच्छिन्नप्रतियोगिताकाभावविशिष्टसाध्याभावः सकलपक्षवृत्ति तद्धर्मावच्छिन्नत्वमुपाधित्वमित्येव पक्षतावच्छेदकमलाघवादिति वाच्यं

मू० म०

तस्यापि लक्ष्यतावच्छेदकांतरत्वात् लक्ष्यतावच्छेदकांतरसंभवस्य लक्ष्यतावच्छेदकादोषत्वात् लक्ष्यतावच्छेदकगौरवस्याप्यकिंचित्करत्वात् एतदेव लक्ष्यतावच्छेदकद्वये
व अयोगोलकं धूमवत्वं केचित्तत्र मुख्यसाध्यव्यापके आर्द्रेंधने क्रमेणासंगमयति यथेति व्यावर्त्तते हीति आवर्त्तते हि धूमवत्वं तद्व्याप्यस्य अयोगोलक इति योजना तद्व्या
प्यस्येत्यत्रापि वैशिष्ट्यं तृतीयार्थः तथाहि यस्मात् तद्व्याप्यवृत्ति विशिष्टे अयोगोलके साधनाधिकरणे धूमवत्वं नावर्त्तते धूमस्याभावो वर्त्तत इत्यर्थः एतेन प्रथमलक्ष्यताव
च्छेदकमुपपादितं ननु तथापीत्याप्यत्वगर्भे द्वितीयलक्ष्यतावच्छेदकं तत्रार्द्रेंधनेऽव्याप्तमेव तस्माद्वाधिकरणे पक्षीभूते योगोलके साध्याभावसत्वेपि पक्षवृत्तिध
र्मस्याविशेषणतया तद्विशिष्टसाध्याभावादित्यत आह अत एवेति साध्याभावसत्वादेवेत्यर्थः तत्रेति साध्यसाधनसंबंधाभाववत्त्वेन पक्ष इति योजना साध्यसाधनसंबं
धाभावः साध्यवद्विशिष्टसाध्याभावः महानसायोगोलकान्यतरत्वादिरूपपक्षवृत्तिधर्मविशिष्टसाध्याभाव इति यावत् तत्र पक्षे अयोगोलकरूपे पक्षे मुख्यसाध्याभाव
सत्वे विशेषणाप्रसक्तेऽपि विशेष्याभावरूपतस्य विशिष्टसाध्याभावस्यावश्यकत्वादिति भावः ननु तथापि ध्वंसो न नित्यो जन्यत्वादित्यत्र जन्यत्वरूपसाधनावच्छिन्नसाध्यव्या
पकेऽभावत्वे प्रथमलक्ष्यतावच्छेदकसाध्यव्याप्तिः तत्र साधनाधिकरणे ध्वंसे जन्यत्वरूपपक्षधर्मविशिष्टानित्यत्वाभावस्य ध्वंसो न जन्यत्वे सत्यनित्यः भावत्वाभावादित्यनुमान
सिद्धत्वेप्यनित्यत्वसामान्याभावरूपस्य मुख्यसाध्याभावस्य साधनाधिकरणे सत्वेनाभावात् एवं वायुः बहिरिंद्रियप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपसाध राम०
र्मावच्छिन्नसाध्यव्यापके उद्भूतरूपवत्वे तस्याव्याप्तिः तत्रापि साधनाधिकरणे वायौ उद्भूतरूपपक्षधर्मविशिष्टबहिरिंद्रियप्रत्यक्षत्वाभावस्य पुनरुद्भूतत्वे सति बहिरिंद्रियप्रत्य

क्षःउद्भूतरूपवत्त्वाभावादिरनुमानसिद्धत्वेपिवहिरिंद्रियग्राह्यत्वरूपस्य शुद्धसाध्याभावस्य साधनाधिकरणे सत्त्वे मानाभावादित्यत आह एवमिति ध्वंसे पक्षीभूते ध्वंसे जन्म
त्वानित्यत्वयोः संबंधश्च जन्मत्वरूपपक्षधर्मविशिष्टाः नित्यत्वात्यंताभावः निवर्तमानः निवृत्तिप्रतियोगित्वेन सिद्धिविषयो भवन् पक्षधर्मतावलादिति जन्मत्वरूपस्य वि
शेषणस्य विशेषणस्य पक्षवृत्तितानिश्चयस्य हेत्वादित्यर्थः अनित्यत्वाभावं अनित्यत्वाभावरूपं शुद्धसाध्याभावं तथेति निवर्तमानं निवृत्तिप्रतियोगित्वेन ज्ञापयमा
नं इष्यते सतीति इयत्त्वविशिष्टवहिरिंद्रियग्राह्यत्वमित्यर्थः निवर्तयत् निवृत्तिप्रतियोगित्वेनानुमापयत् प्रमत्वाभावमाराये ति वहिरिंद्रियग्राह्यत्वाभाव
रूपं शुद्धसाध्याभावमाहाय्येत्यर्थः सिध्यतिइयत्त्वविशिष्टवहिरिंद्रियजन्मप्रत्यक्षत्वेविधृतिः सिध्यति तथा चेति साध्याभावसिद्ध्या शुद्धसाध्याभावसिद्ध्यातासाध्यसाध
नसंबंधाभावोऽस्तीति साधनाधिकरणे शुद्धसाध्याभावोऽस्तीत्यर्थः प्रकृते पक्षस्यैव साधनाधिकरणत्वादिति भावः स्वव्याघातकत्वेन स्वं साध्याभाववदभाववत्साध्यकत्वेन
साध्याभावाभावव्याप्यत्वेनेति यावत् साध्याव्यापकत्वादिति साधनाधिकरणे साध्याभावासमानाधिकरणत्वादित्यर्थः पक्षवृत्तिधर्मविशिष्टसाध्याभावव्याप्यत्वाद्वे
तिवोध्वंसांशज्ञापकात् अन्योन्यतरस्मादिस्तत्वाद्व्यभिचारोन्नायकत्वेन दूषकतापक्षेलक्ष्यतावच्छेदकमुक्तासत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकत्वं यवदंतिनमतेनलक्ष्य
तावच्छेदकमाह अप्रमेयत्वेति पक्षावृत्तेति यस्य साधनस्य पक्षावृत्तित्वेति योजना सर्वस्मिन् पक्षे इति शेषः यस्य साधनस्येत्यत्र येन केनापि संबंधेन संबंधित्वं षष्ठ्यर्थः अन्वय
त्वस्य पदिसत्र वृत्तीयावसहार्थे तथा च येन केनापि संबंधेन यत्साधनसंबंधिनो यस्य व्यापकस्य सर्वस्मिन् पक्षे प्याध्वंसं निवर्तते साध्याभावो वर्तते सत्त्व हेतावुपाधिरित्यर्थः

मू०म०

उद्भूतरूपाद्यभावेन संहापि प्रमक्षसत्ताभावस्य सर्वस्मिन् पक्षे वर्त्तनस्येति न विशिष्टसाध्यव्याप्तिः येन केनापि संबंधेन पक्षो ऽधर्मसंबंधित्वमेवोपाधित्वव्यवहारप्रयोजकमि
तिबोधनाय संबंधिन इत्यंसं यस्येति स्यविशेषणं न तु तत्र सत्ताघटकं परं तु पक्षधर्मावच्छिन्नप्रतियोगिताकाभावविशिष्टसाध्याभावस्याधिकरणां तद्धर्मवत्त्वमुपाधित्वमि
त्येव लक्षणं पर्वतो वह्निमान् धूमादित्यादौ महानससत्ताद्यभावविशिष्टस्य साध्याभावस्याधिकरणं न पक्ष इति न तत्रातिव्याप्तिः अयोगोलकं पक्षः वह्नेरित्यत्र महान
सत्तादिकं च न लक्ष्यमेव द्रव्यं वह्निमद्धूमादित्यादौ वह्निसामग्र्याद्यभावविशिष्टसाध्याभावस्य पक्षवृत्तित्वेपि न सकलपक्षवृत्तित्वमतो न तत्रातिव्याप्तिः तत्रापि पक्षो
भापकत्वेन दूषकता पक्षे साधनव्यापकस्यापि पक्षावृत्तेरुपाधित्वात् साध्यव्यापकसाधनव्यापकस्यापि पक्षवृत्तेरनुपाधित्वात्तत्र जलत्वादौ द्रव्यं धूमात् धूमादित्यादौ व
ह्निसामग्र्या एव वातिव्याप्तिः पर्वतो धूमवान् वह्नेरित्यादावार्द्रेन्धनादिवद्व्याप्तिर्वा साध्यसमानाधिकरणवृत्तित्वेन च तद्धर्मो विशेषणीयः तेनायोगोलकं धूमव
ह्नेरित्यादौ साध्यविरुद्धे जलत्वादौ चातिव्याप्तिरिति निरुक्तोपि दोषः लक्ष्यतावच्छेदकमुक्तालक्षणमाह साध्येति यस्याभावादित्यर्थं पक्षाद्येमं लक्ष्यतावच्छेदकं स लक्ष
णं चद्वयमेवायोगोलकं धूमवन्हेरित्यत्रार्द्रेन्धनमेयोजयति येषेति व्यावर्त्तते हीति हि यस्मान्मद्याव्यासह पक्षामते। योगोलके धूमवत्त्वं व्यावर्त्तते धूमाभावो वर्त्तत इतियोग
नना एतेन लक्ष्यतावच्छेदकं योजितं ननु तथापि व्याप्यत्वगर्भतया लक्षणं तत्र व्यासमेव तदभावाधिकरणावृत्ते योगोलके पक्षवृत्तिधर्मस्य विशेषस्य सत्वेन तत्र विशिष्टसाध्या
भावासत्त्वादित्यत आह अत एवेति अर्थं तत्त्वं एवं वत् ननु तथापि ध्वंसो न नित्यो न मत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापकेभावत्वे वा पूर्वापि दुःखप्रागभावस्य समस्ताप्रयत्नादि राम०

सत्त्वइत्यत्रसपक्षधर्मावच्छिन्नसाध्यव्यापकेऽभूतरूपवत्ते च लक्ष्यतावच्छेदकस्याव्याप्तितदुभयपक्षेशुद्धसाध्याभावसत्वेमानाभावादित आह स्वमितिअर्थस्तु
पूर्ववत् तथा चेति साध्याभावव्यसिद्धेति सहार्थे तृतीया साध्यसाधनेति साधनविशिष्टसाध्याभावव्यहो भवतीत्यर्थः अतो लक्ष्यतावच्छेदकस्य न तत्राव्याप्तिरितिशेषः सा
ध्याभावनिरूपकतादितिपक्षेसाध्याभावस्य मानाभाविकारत्वादित्यर्थः स्वव्याघातकत्वं चैवमेत्याहुः अन्येतु यद्याऽवसेतत्र प्रकरणं तिन्नैव सर्वग्रंथसमंजसयोजयंति तथा हि प
क्षस्यहेतोर्पक्षावृत्साहेतुना साधनस्य साध्यंनिवर्ततिसाधनत्वसंबंधिसाध्याभावः साधयितुं शक्यते साधनविशिष्टसाध्याभावःसाधयितुं शक्यत इति यावत् येनकेनचि
त्संबंधित्वं पक्षार्थः अन्यथा तत्तस्य पक्षसत्त्वतथाप्येनकेनापिसंबंधेन पक्षेतु संबंधिनोपक्षस्य धर्मस्य वत्वादसाहेतुना साधनविशिष्टे तत्र पराघटकं परंतु यद्धर्मव्यापकत्वति
साधानविशिष्टसाध्याभाव सिद्धिस्वरूपयोग्यासधर्मउपाधिरिसेवलक्षणं वायुः प्रत्यक्षः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् गौरमित्रातनयः श्यामः मित्रातनयत्वादित्यादौ
शुद्धसाध्यव्यापके रूपकेरूपवत्त्वशाकपाकजत्वादावव्याप्तिवारणाय साधनविशिष्टत्वं साध्यविशेषणं साधनपदं चपक्षवृत्तिधर्मपरं तेन विरुद्धस्थलीयोपाधौ वायुः प्रत्यक्षः
प्रमेयत्वादित्यादावुद्भूतरूपवत्त्वादौ चनाव्याप्तिः नच्चैवंपर्वतोवह्निमान् धूमादित्यादि वह्निविवह्निहासामग्र्यादेरुपाधिता पत्तिः तदभावस्य उक्तादौ तादृशसाध्याभाव सिद्धिस्वरूपयो
ग्यत्वादित्यतः स्वरूपयोग्यमेवच्छिन्नतोनिर्वक्तिसवेति पक्षस्याभावादितिपूर्ववत् व्याख्येयं तथा च साधनविशिष्टसाध्याभावव्याप्यत्वे सति पक्षतावच्छेदकन वर्तमानत्वमेवतत् अ
योगोलक्षणस्वरूपयोग्यत्वमितिभावः साधनपदं पक्षवृत्तिधर्मपरं एवं सर्वत्र लक्षणानि सुपर्वकृत्पूर्ववत् अयोगोलक्षणमवद्वहेतिस्वार्दधर्मेलक्षणयोजयंति यथेति ननुदृढना

मू० म०

भावस्यकथंसाधनविशिष्टसाध्याभावव्याप्यत्वमित्यत आह व्यावर्त्तते हीति हि यस्मात्तस्मात् व्यावर्त्तते यावद्विप्रतिपत्तियोगित्वेनानुमीयते अयोगोलके पक्षीभूतेऽयोगोलके नवह्ने
तावत्तात् तदभावस्य शुद्धसाध्याभावव्याप्यत्वेपि पक्षवृत्तिधर्मविशिष्टसाध्याभावव्याप्यत्वं न संभवति तदभाववति पक्षे शुद्धसाध्याभावसत्वेपि तादृशविशिष्टसाध्याभावास
त्वादित्यत आह अत एवेति अर्थस्तु एवंवत नन्वधसोननिसोजमत्वात् वायुर्वह्निरिंद्रियग्रमस्यः प्रमेयत्वादिसादौ भावत्वोभूतरूपवत्वाद्रूपाद्यो भावस्यजमत्वद्रव्य
त्वादिरूपपक्षधर्मविशिष्टसाध्याभावव्याप्यत्वज्ञानात्तदभावेन हेतुना तादृशविशिष्टसाध्याभावानुमितिर्भवतु शुद्धसाध्याभावानुमितिः कथं स्यात् न च तदनुमितिविरहेपि
न क्षतिरिति वाच्यं निरुपक्तोपाधिज्ञानस्य पक्षे शुद्धसाध्याभावानुमितिद्वारैव दूषकत्वस्याभ्युपेयत्वाद्विशिष्टसाध्याभावानुमितेः शुद्धसाध्याभावानुमितावप्रतिबंधकत्वादित्य
त आह एवमिति निरुक्तस्योपाधिकत्वरूपत्वे इत्यर्थः तज्ज्ञानादिति शेषः यद्वा एवमित्यस्य पर्वतायोगोलकं धूमवद्वह्नेरित्यत्रार्द्रेंधनाभावस्य द्रव्यत्वादिरूपपक्षधर्मविशिष्ट
साध्याभावव्याप्यत्वज्ञानानंतरं तदभावेन हेतुना पक्षे तादृशविवक्षितेत्यर्थः अयमर्थः तत्राप्येतदाशंकासंभवादिति भावः भावत्वव्यावृत्तेस्तस्य जन्यत्वविशिष्टतिमत्वाभावाभा
वव्याप्यज्ञानानंतरमित्यादिः अग्रेपि तथेत्यस्य द्रव्यत्वविशिष्टवह्निरिंद्रियग्राह्यत्वाभाववद्वह्निरिंद्रियग्राह्यत्वाभावव्याप्यत्वज्ञानानंतरमिति शेषः न चावेत्यादि यं ग्रंथस्य
सांप्रतं पि कवयोजनीयः साध्याभावतर्कत्वादित्यस्य तु निरुक्तसाध्याभावविशिष्टस्वरूपयोग्यत्वाभावादित्यर्थ इति हेतुतत्पक्षवृत्तित्वेन व्यतिरेकिधर्मत्वमिति मिति केवलान्वयि राम०
नः प्रमेयत्वादेः स्वरूपसंबंधेन कुत्राप्यनुपाधित्वाद्यतिरेकित्वोपापादनं तथा च तत्संबंधेन स्वप्रतियोगिनधिकरणीवृत्तिमात्रस्याभावस्य प्रतियोगितानवच्छेदकोयो धर्मस्वत्वं तेन रूपेणा

तत्संबंधेनचोपाधित्वमितिफलितंतेनप्रमेयत्वादेःसमवायादिसंबंधप्रतियोगित्वेपिनस्वरूपसंबंधेनोपाधित्वंनवास्वरूपसंबंधेनसंयोगाभावादेरुपाधित्वंतेनसंबंधे
नतदभावाधिकरणाप्रसिद्धेःसंबंधविशेषस्याभावेनवधर्मपदमितिभावः तत्तदुपाधेरितितत्तत्साध्यकतत्तद्धेतुकोपाधेस्त्विसर्थ लक्षणमितिमनुपपद्यते धूमवह्निसंबं
धोपाधिरिति धूमाव्यापकत्वेसतिवह्निसंबंधावच्छिन्नत्वेनाभिमतोपाधिपदवाच्यताश्रयइत्यर्थः व्यतिरेकिधर्मत्वावच्छिन्नोपाधिपदवाच्यतावारणायाभिमतावा
च्यताविशेषणाययद्यपिधूमव्यापकत्वेसतिवह्निव्यापकत्वंयदर्दुपाधिपदवाच्यतावच्छेदवाच्यतावच्छेदकंस्यान्नतदतदवच्छिन्नोपाधिपदवाच्यताश्रयःपक्षेतरःस्यादितता
पादनेनैवपक्षीकरणापत्तयापितदुपाधिपदवाच्यतावच्छेदकत्वंधूमाव्यापकत्वेसतिवह्निव्यापकतासामान्यनिष्ठस्यान्तदापक्षेतरवृत्तिधूमाव्यापकत्वविशिष्टवह्निव्यापक
त्वविशिष्टमपिस्यादेसाधारणतात्पर्यंआपाद्येतिधूमाव्यापकत्वविशिष्टवह्निव्यापकताप्रसिद्ध्यातद्घटितायाघातप्रसिद्धेरित्यपिबोध्यं ननुसामान्यलक्षणमिदंकृतंतत्त
ध्यकतत्तद्धेतुकोपाधिलक्षणंपूर्वदूषणोपपादकंतच्चयत्किंचिद्धर्मावच्छिन्नतत्तत्साध्यव्यापकत्वेसतितत्तत्साधनाव्यापकत्वेनाविशिष्टसाध्यव्यापकोपाधौनातिव्याप्तिरितितद्व्या
हृद्विशेषणलक्षणेइति यत्किंचिद्धर्मावच्छिन्नतत्तत्साध्यव्यापकत्वेसतितत्तत्साधनाव्यापकत्वरूपेतत्तत्साध्यकतत्तद्धेतुकोपाधिलक्षणास्यार्थः दूषणोपपादकइतिशेषः कश्चिद्धूम
संबंधेधूमवह्निसंबंधज्ञानेधूमवह्निव्याप्तिज्ञानइतियावत् पक्षेतरस्येतिपक्षेतरनिष्ठतद्रूपज्ञानस्यप्रतिबंधकत्वप्रसंगइत्यर्थः नचेष्टापत्तिःपक्षेतरत्वादिनिष्ठसाध्यव्या
पकत्वेसतिसाधनाव्यापकत्वज्ञानस्यप्रतिबंधकत्वस्यतत्पितनिष्ठयत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वज्ञानस्यप्रतिबंधकताघाःकेनाप्यनभ्युपगमा

मू० म० दितिभावः ननु स्वव्यतिरेकेण पक्षे साध्याभावोन्नायकत्वस्यालक्ष्यतानियामकत्वमतेऽप्येवं वह्निमान् धूमादित्यादौ साधनाव्यापकस्यापि वह्निसामग्र्यादेरुपाधित्वशंकापा
मिष्टापत्तिमाह केचिदितीति स्वव्यतिरेकेण पक्षे साध्यव्यतिरेकोन्नायकत्वस्यालक्ष्यतानियामकत्ववादिनस्त्वित्यर्थः प्रत्येति साधनस्य पक्षमात्रवृत्तेस्तद्व्यापकस्यापि पक्ष
वृत्तित्वावच्छेदकत्वात्तस्योपाधित्वासंभवात् यथोक्तस्य लक्ष्यतानियामकत्वमते पक्षवृत्तिनिधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वस्योपाधिः लक्षणत्वादिति भा
वः अत्र च दृष्टांतमाह यथेति तत्रैवेति पक्षे वृत्तिहेतावित्यर्थः ननूपाधेर्यथोक्तलक्षणस्य साध्येऽपि सत्त्वात् परार्थस्थले साधस्यापि साध्यतावच्छेदकरूपेणोपाधितयो
द्भावनापत्तिरित्यत आह साध्यं चेति नोपाधिः साध्यतावच्छेदकरूपेणोपाधितयानुद्भाव्य व्यभिचारसाधने तद्व्यभिचारादिरूपेण तत्साधनेऽप्यादिपदात्तदभावपरिग्रहः साध्या
भिचारित्वादिति साध्यव्यभिचारादिरूपस्य साध्यस्याविशेषादित्यर्थः तथा च साधनादिरूपेण तद्व्यभिचारादेरुन्नेयत्वेऽनुन्नेयत्वेऽपि तथैव तद्व्यभिचारादिना हेतुना साध्यव्यभिचा
राद्यनुमितिसंभवात् न तस्योपाधित्वेनोद्भावनमिति भावः ननु तथापि संदिग्धोपाधित्वे [redacted] न तस्योपाधित्वापत्तिरित्यत आह अनुमितिमात्रेति परार्थानुमितिमात्रेत्यर्थः
स्वतंत्र्यापाततः पत्रेन तदुद्भावनं तत्रैव परार्थानुमितिमात्रेति परार्थानुमितिमात्रे भवात् परोक्तकथकसंप्रदायानिर्विवादत्वान्न तदुद्भावनमित्येवं तत्त्वं उपाधिसामान्यलक्ष
णं उपाधिसामान्यं लक्षयित्वा विशेषलक्षणार्थं विभजते स चेति हेतुव्यभिचारसंशायकत्वेनेति साधनाव्यापकत्वसंदेहे साधने साध्याव्यापकव्यभिचारस्य साध्यव्यभि राम०
चारस्य पक्षसंदेहात् साध्यव्यभिचारसंदेहः साध्यव्यापकत्वसंदेहे हेतुसाधनाव्यापकत्वाव्याप्यत्वसंदेहात् साध्ये साध्ये साधनाव्यापकत्वसंदेहः व्याप्यसंदेहस्य व्यापकसंदेहे हेतु

त्वादिति भावः संदिग्धोपाधिः संदिग्धोपाधित्वं तेन तत्रैव तत्र सम्यर्थस्यैनान्वय प्रथमस्योदाहरणमाह यथेति शाकाद्याहारस्य परिणतिजत्वमित्रीशाकादिघटितयावज्जरस्या
मसामग्रीमत्त्वमित्यर्थः तेन नाधिमग्रंथासंगतिः परार्थस्याभिप्रायेणाशंकते नचेति तेनैव मित्रातनयत्वेनैव तदपि तादृशसामग्रीमत्त्वमिति साध्यमिति पक्षवृत्तित्वशंका धी
न साधनाव्यापकत्वसंदेहनिरासाय वाधितसाधनमित्यर्थः उपाधित्वादिति संदिग्धोपाधित्वेनोद्भाव्यत्वादित्यर्थः ननु मित्रातनयत्वेन हेतुनापुप्पदेवोभयसाधनीयं तत्रचरमा
मत्वादेर्नोपाधित्वेनोद्भावनं संभव साध्यस्योपाधित्वेनानुद्भाव्यत्वनियमादित आह उपस्यापीति शुभामत्वमात्रेहीति इदमुपलक्षणं युगपदुभयस्य साधनेप्येकांशेऽपर
सोपाधित्वेनोद्भाव्यते बाधकाभावात् व्यभिचाराद्यनुमाने साध्याविशिष्टतया स्वस्मिन् साध्ये एव स्वस्योपाधित्वेनानुद्भाव्यत्वनियमादित्यध्येयं नचैवमिति एवं साध्यसाम
ग्र्या अप्युपाधित्वग्रहविषयत्वे वस्त्वनुमानेति वस्त्वनुमितस्याधानस्थलेपि उपाधिः स्यात् तदुपाधित्वग्रहविषयः स्यात् इष्टापत्तौ चानुमितिसंभवादिति भावः अनौपाधिकत्वनि
यमादिति व्याप्यत्वनियमादित्यर्थः साध्यसामग्र्या अप्युपाधित्वग्रहविषयत्वे आचार्यसंवादमाह अतएवेति साध्यसामग्र्या अप्युपाधित्वग्रहविषयत्वादेवेत्यर्थः नोपाधिर्नोपा
धित्वग्रहविषयः उपाधिः उपाधित्वग्रहविषयः क्वचिन्नोपाधिः क्वचिन्नोपाधित्वग्रहविषय ननु सर्वत्रैवेति नोपाधित्वग्रहविषय इति शेषः द्वितीयमुदाहरति यथेति तुल्येति साधनीभूत
कार्यत्वनिष्ठसाध्यीभूतसकर्तृकत्वव्याप्यताग्राहकसहचारग्रहसाधनीभूतकार्यत्वाव्यापकशरीरजन्यत्वादिनिष्ठसाध्यीभूतसकर्तृकत्वव्यापकताग्राहकसहचारग्रहरूपयोः योग
क्षेमयोः अनुकूलतर्कसमवहितत्वेन तुल्ययोः सतोरित्यर्थः उपाधेरिति कार्यत्वरूपसाधनाव्यापकीभूतशरीरजन्यत्वादेः साध्यव्यापकतासंदेहस्य सत्त्वेन तथा च क्षितिः सकर्तृका कार्यत्वादित्यत्र

मू० म०

यत्साधने साध्यव्याप्यतानिश्चायकः साधनाव्यापकः शरीरजन्यत्वादौ साध्याव्यापकतानिश्चायकस्तर्को नावतीर्णः तद्दशायां शरीरजन्यत्वादिकं साध्यव्यापकतासंदेहात्संदिग्धोपाधिरित्यर्थ
न चैतस्य सद्धेतुतया कथं तत्रोपाधिरिति वाच्यं सद्धेतावपि दशाविशेषे संदिग्धोपाधिकत्वे बाधकाभावादिति भावः तृतीयमुदाहरति यथा वेति शाकपाकजत्वस्येति साधना
व्यापकतया संदिग्धस्य शाकपाकजत्वेस्यर्थः मैत्रीतनयत्वे मैत्रतनयत्वहेतौ शाकपाकजत्वमिति शेषः न वा हेत्वाभासांतरं न वा हेत्वाभासः किं त्वनुयोज्येति तथा च स्वार्थानुमान ए
वोपाधित्वसंदेहो दूषणं न तु परार्थानुमानेपीति भावः संदिग्धानैकांतिकवदिति अनैकांतिकत्वसंदेहवदित्यर्थः एतद्दूषकमात्रे दृष्टांतः तेन व्यभिचारसंशयाधायकत्वेप
स्य न क्षतिः दूषणतात् उपाधित्वसंदेहस्य दूषकतात् । उपाधिकृदिव उपाधित्वनिश्चय इव निश्चयाधायकतया व्यभिचारनिश्चयाधायकतया न च तथाप्युपाधित्वसंदेह
ः स्वरूपसन्नेव व्यभिचारसंदेहद्वारा दूषको न तु तज्ज्ञानमिति तद्द्वारार्थं तदुद्भावनमफलमर्थांतरापादकं धेतिवाच्यं तथा सत्यनैकांतिकत्वसंदेहोपाधित्वनिश्चयोद्भावनस्य
तथात्वापत्तेः यद्वानैकांतिकत्वसंदेहादिना मम व्याप्तिग्रहो माभूदिति ज्ञापनाय तदुद्भावनं कथकसंप्रदायप्रसिद्धं [redacted] तदोपाधित्वसंदेहान्मम व्याप्तिग्रहो माभूदि
ति ज्ञापनायोपाधित्वसंदेहोद्भावनमपि कथकसंप्रदायप्रसिद्धमिति तुल्यत्वादिति भावः उपाधिपूर्वभागरहस्यं प्रसंगादुपाधेर्दूषकताबीजं निरूपयितुं प्रतिज्ञावधानाय
प्रतिजानीते इदानीमिति उपाधिविभागानंतरमित्यर्थः दूषयते ज्ञाप्यते केचित्तु दूषकताबीजं दूषकव्यवहारविषयतावच्छेदकं शब्दोपाधिशब्दयोः पर्यायितापत्ता दूषकशब्दस्य राम०
पारिभाषिकतायां सा च प्रयोजनस्य हरणस्य तद्विषयताच्छेदकत्वासंभवात् इति भावः इत्याहुः तदसत् तथा च तत्सत्ताद्दशानुमितिप्रयोजकत्वं नाम दूषकमिति फलितं एवं च सत्यति

पक्षेसाध्यासाधकहेतौ रूपमासान्तरं वादिना साध्याभावसाधकहेतावुपन्यस्ते सत्प्रतिपक्षे उपाध्युद्भावनं न स्यादित्यग्रिमग्रन्थासंगतेः स्वस्वव्यतिरेकेणेति लिंगतावच्छेदकवि
धयास्वव्यतिरेकलिंगकपक्षविशेष्यकसाध्याभावानुमितिप्रयोजकतये सर्थ इतीयार्थो ऽनेन सत्प्रतिपक्षान्तरवदिति साध्याभावसाधकहेत्वन्तरस्य यथा नोद्भावनं तथोपा
धेरप्युद्भावनं स्यादित्यर्थः साध्याभावसाधकहेतुज्ञानात्मकप्रतिबंधकसत्त्वादुपाधेस्तत्र पर्यो ऽकदूषकत्वासंभवेन अर्थत्वादिति भावः सत्प्रतिपक्षवाद्युपेनेति साध्यसाधकाने
कहेतुमत्ताज्ञानसत्त्वेनेत्यर्थः साध्याभावसाधकहेतुमत्ताज्ञानसत्त्वेपि साध्यानुमितेरुपमादृविशेषः व्याधिकवैसार्थ्यमिति साध्याभावसाधकानुमितिप्रतिबंधकसाध्यानुमिति
र्थमेवेत्यर्थः नचैवं सत्प्रतिपक्षान्तरस्याप्युद्भावनापत्तिरिष्टत्वादिति भावः। शतमपीत्यादि तां विकल्पवादात् तथाच साध्याभावसाधकहेतुज्ञानासत्त्वसाध्यसाधका
नेकहेतुज्ञानासाध्यानुमित्यसाध्यत्वव्याघातः अन्यथा नासाध्याभावसाधकहेतुमत्ताज्ञाननिष्टापत्त्यापत्तिज्ञानाद्यभावविशिष्टत्वानादि यथानांसाध्यसाधकहेतुनांशतम
पि नयद्युपतिमसाध्याभावसाधकहेतुमत्ताज्ञानसत्त्वेसाध्यानुमितिजनयतीति तदर्थादि[redacted]तिभावः ननु तन्यायोऽप्रमाणमित्यत आह स्वेमापीति तदभावसाधकैकहेतुमत्ताज्ञा
व नेनापि तत्साधकानेकहेतुमत्ताज्ञानानां फलप्रतिबंधस्यानुभवसिद्धत्वापेत्यर्थः नाप्येदं असंभवितद्ज्ञातानं प्रतितदभावव्याप्यवत्त्वोधर्मवत्ताज्ञानसत्त्वेनैव प्रतिबंधकत्वादित्यत आ
ह व्याप्तीतिवत्त्वं ज्ञानविषयतया प्रतिबंधकतावच्छेदकं तच्चतादृशप्रतिबंधकतावच्छेदकं चतुल्यमेवेति तदभावव्याप्यत्वोधर्मवत्ताज्ञानत्वतदभावव्याप्यैकधर्मवत्ताज्ञानेप्यविशि
ष्टमेवेत्यर्थः ननु अपत्स्वमपीतिनतुव्याप्यनिष्ठभूयस्त्वमपीतिज्ञु तु व्याप्यतिष्ठभूयस्त्वमपीत्यर्थवत्समितानुषक्तप्रतिबंधकतावच्छेदकमितितदर्थः अत्र हेतुमाह स्वकसादृपीति यत्र

मू० म०

तजद्भावव्योरेकधर्मत्पेकस्येवव्याप्यधर्मवत्ताज्ञानंतत्रैवव्याप्यधर्मवत्ताज्ञानादित्यर्थः अनुमितेरितिसंबंधः क्वाचित्कःपाठः अनुपपत्त्यादनुमितेर्विशिष्टमितिविरहात्इत्यर्थः अनुमि
तेरित्यकारसंवलितपाठेऽपि अतुपश्चात्मितेर्विशिष्टबुद्धयभावस्यप्रमितेरित्यर्थः ननुसत्प्रतिपक्षेनानुमानदूषणं। यथार्थमुपाध्युद्भावनमपितुदत्तदुपुव्याप्तिपक्षधर्मतान्यतरप्रसंगहे
तुमत्तापरामर्शेभ्रामारोपग्रहार्थमेवतदुद्भावनमतएवास्माकंव्याघातसम्यग्बोधहेत्वेतिप्रमाणाद्यैकोऽपिद्विचपत्रवादिप्रतिवादिनोःसाध्यतदभावसाधकसाम्यमात्रप्रतिकूल
मध्यस्थस्यचैवंसापिहेतोरनुकूलतर्कास्फूर्तावप्याप्तिनिश्चयोजातस्तत्रैवोपाध्युद्भावनेनसपक्षमात्रवृत्तेनदुष्करत्वेनदुष्टत्वमेवअन्यथाव्यभिचाराद्युद्भावनापराकृततयादूषकत्ववादि
नामप्येतद्दोषस्यदुरुद्धरत्वात् व्याप्तिनिश्चयसत्त्वेनव्यभिचारादिज्ञानस्यासंभवादिसमत्ररसादाह संदिग्धोपाधेरिति उपाधित्वसंदेहदशायामुपाधेर्दूषकत्वापत्तेश्चेत्यर्थः तद्व्यति
रेकस्यसंदिग्धत्वादितिपाठः तद्व्यतिरेकस्यतद्धर्मीसाध्याभावव्याप्यतयातत्वेनासंदिग्धत्वादित्यर्थः क्वचित्तुतद्व्यतिरेकस्यपक्षेसंदिग्धत्वादितिपाठः तत्रसंदिग्धोपाधेरित्यस्यपक्षे
वृत्तित्वेनासंदेहदशायामुपाधेरित्यर्थः अयेचपक्षेतरवृत्तिमस्यपक्षेवर्त्तितपाविनिश्चितस्त्वेमननुसत्यतिपक्षतेऽप्युपाधिदूषकत्ववादिनयेउपाधित्वादिसंदेहदशायांउपाधेरदूषकत्वेऽव्याप
तिरेकमतआह अपिचेतिउपाधित्वान्नस्यात्उपाधेर्दूषकत्वंनस्यात्व्यतिरेकइतितद्व्यतिरेकस्यासाधारण्यादित्यर्थः पक्षमात्रवृत्तित्वस्यासाधारणत्वरूपत्वादितिभावः ननुपक्षमात्रवृत्तित्व
रूपासाधारण्यज्ञानंनानुमितिविरोधिकिंतुवस्तुपक्षव्यावृत्तत्वरूपतद्ज्ञानमेवतथात्वतच्चतत्रनास्तिपक्षस्येवविपक्षत्वादित्यतआह पक्षवृत्तिश्चेति पक्षवृत्तिताज्ञानदशायां। धृतउपाधि
दूषकोनस्यादित्यर्थस्वातंत्र्येणोति स्वात्मपविषयकलौकिकसाक्षात्कारविषयमात्रत्वेसतिलौकिकसाक्षात्कारविषयत्वादित्यर्थः असरेणुरात्मादौदृष्टांतःव्यभिचारस्फुरणंयावदिति आत्माविरागत्वमिति

शङ्केः स्वसाधनाव्यापकस्य वृत्तित्वाय हादित्यर्थः तद्वत्स्वरोगेति साध्यं व्यापकत्वे सति साधनाव्यापकत्वरूपस्योपाधिलक्षणस्य सत्त्वादित्यर्थः अन्यथापीति पक्षवृत्तित्वं विनापीत्यर्थः पक्षेतरेति
ताभ्रमेरोगेति शेषः दूषकत्वसंभवात् कराधितदूषकत्वसंभवात् दूषकताप्ति प्रसंगस्यादोषत्वादिति भावः केचित्तु ननु तन्नोपाधिलक्षणमपि तु पक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे स
ति पक्षावृत्तित्वे वनत्यन्नेस्वरगांत तन्नास्ति पर्योत्कस्य दूषकत्वरूपत्वाभयानुपपत्तेस्तथैव रूपनादेस्तत्र अन्यथापीति यथोत्कपक्षभिन्नस्यापि दूषकस्य संभवाद्धेतमर्थः तथा च किंत
कत्वमामाणिकव्यवहारविषयस्य तस्यानुपाधित्वाभ्युपगमे नेति भावः इत्याहुः तन्नुसत्त्यति यथोत्तोव्यापके न दूषकतावादिनोममपक्षवृत्तितयाहदशायामुपाधेर्दूषकेत्वपत्तेरेवि
तत्त्वाह किंचेति साध्यव्याप्यस्येति साध्यव्याप्यतया निश्चितस्य साधनस्याव्यापकताज्ञानेनोपाधेः साध्याव्यापकत्वज्ञानेऽस्यर्थः सत्त्वेति पक्षसाध्याभावप्रहः अव्यापकव्यतिरेकादि
ति अव्यापकतयागृहीतस्य व्यतिरेकात् अव्याप्यतयागृहीतस्य व्यतिरेकग्रहस्येत्यर्थः प्रसिद्धत्वेनेति हेतुविशेष्यकव्याप्यभावप्रकारकज्ञानस्यानुमितिकारणीभूतव्याप्तिग्रहप्रतिबंधक
स्य विशेषकव्याप्यत्वाविधयाप्रयोजकत्वेनेत्यर्थः दूषकत्वमित्यनुषज्यते तत्तिया यर्थश्चे पूर्ववत् उपाध्यभावस्य व्याप्तित्वे हि उपाधिव्याप्यभावरूपतया दूषकः स्यात्तदेव च सिद्धान्तसिद्धव्या
घाताभिराकृतमित्याह अनौपाधिकत्वेति उपाधिर्न दूषकः किंतु व्याप्यत्वासिद्धिरूपहेत्वाभासान्तर्गत एव सद्धेतिकस्यादिन्नतं दूषयतीत्यावीति अनौपाधिकत्वज्ञानस्य उपाधित्वप्रकारकोपा
धिज्ञानाभावस्य व्याप्तिज्ञानकारणेति व्याप्तिज्ञानकारणीभूताभावप्रतियोगिज्ञानविषयत्वेनेत्यर्थः व्याप्यत्वासिद्ध्याः प्यत्वासिद्धेः साधारणादिभिन्नव्याप्तिग्रहप्रतिबंधकज्ञानविषयस्यैव व्या
प्यत्वासिद्धत्वादिति भावः दूषयति नहीति अन्यस्य साधनभिन्नस्य अन्यस्य व्याप्तिज्ञाने साधनभिन्नस्य व्याप्तिज्ञाने साधनेऽस्य व्याप्तिज्ञानमिति यावत् स्वतः प्रतिबंधकमिति साक्षात्प्रतिबंधकमि

मू० म०

सर्वथा भिन्नधर्मिकत्वादिति भावः तथा चानुमितिकरणज्ञानामात्रं प्रतिसाक्षात्प्रतिबंधकज्ञानविषयस्यैव च हेत्वाभासतया कथमस्य हेत्वाभासेंऽतर्भाव इति हृदयं भिन्नधीधर्मिकत्वं परिहर
माह नचेति साध्यव्यापकेति अव्याप्यतासंबंधेन साध्यव्यापकत्वज्ञानदूषसमर्थः तथा च तद्विषयकत्वमेवोपाधिर्व्याप्यत्वासिद्ध्यंतर्गत इति भावः साध्यव्यापकेति अव्याप्यतासंबंधेन साध्यव्या
पकाभाववत्तज्ज्ञानमीसमर्थः येनेति जनकीभूतज्ञानं विघटयत एव ग्राह्याभावावगाहिनो ज्ञानस्य प्रतिबंधकत्वनियमादिति भावः तत्किं व्याप्यतासंबंधेनोपाधिमत्ताज्ञानं व्याप्ति
ज्ञानविघटकमेव न भवतीत्यत आह किंचेति साध्यव्यापकेति अव्याप्यतासंबंधेन साध्यव्यापकोपाधिमत्ताज्ञानेन समर्थः साध्यव्यभिचारेति व्याप्तिज्ञानं विघटयतइति शेष ए
तद्व्युत्समाधिसौकर्यादुक्तं तस्य तोऽव्याप्यतासंबंधेन हेतावुपाधिमत्ताज्ञानस्य विषयस्य प्रतिबंधकत्वेऽप्युपाधेर्व्याप्यत्वासिद्धित्वसंभवः उपाधिविशिष्टहेतुनिरूपितविषयत्वस्यैव व्याप्ति
ग्रहप्रतिबंधकतानियमतया तद्विशिष्टहेतोरेव तथात्वसंभवात् तथा व्याप्यत्वासिद्ध्यंतर्गतसाध्याद्देरपि प्रसंगे कं व्याप्यत्वासिद्धिव्यापनेति इति हेत्वाभासेषु अस्मत्तुनु उपाधिर्दूषकश्चेद् दूषक
त्वं तु स्वव्यभिचारलिंगकसाधनपक्षकसाध्याव्यभिचारानुमितिप्रयोजकत्वेनेति मतं दूषयति नापीति दूषकमित्यनुषज्यते तत्तीयार्थस्य एवं च साध्यव्यभिचारित्वेनेति साध्यव्यापको
पाधिव्यभिचारित्वेन समर्थः तथेति तत्संबंधमिति शेषः साध्यव्याप्येति साध्यव्याप्येति साध्यव्याप्यसाधनाव्यापकत्वेन समर्थ साध्यव्यभिचारित्वं साध्यव्यापत्वं व्याप्तिमित्याह केति उपाधिनिष्ठ
साध्यव्यापकताया हेतुसहचारादित्यह हेतुनिष्ठसाध्यव्याप्तिग्राहकसहचाराद्विरहयोरस्तु सत्वादिसमर्थः साध्यव्यापकस्याव्यापकत्वेनेति साध्यव्यापकस्याव्याप्यत्वलिंगेन समर्थः विसि विरहे इति साध्य रम०
नपक्षकसाध्यव्याप्यविरहानुमितिप्रयोजकत्वे समर्थः दूषकत्वमित्यनुषज्यते साध्यव्याप्येति साध्यव्याप्यसाधनेसमर्थः उपाधिर्हेत्वाभासांतरमिति आभासस्य दोषस्य योहेतुः प्रयोजकः तस्मादंतर

मितिव्युत्पत्त्याउपाधिरदूषकइत्यर्थः राजदंतादित्वात्षष्ठीतत्पुरुषसमासेपिहेतुशब्दस्यपूर्वनिपातः केचित्तु हेत्वाभासांतरमितिबाधसत्प्रतिपक्षाद्यतिरिक्तोनुमितिसामान्यप्रतिबंधकज्ञानवि
षयोहेत्वाभासइत्यर्थमाहुः तन्न नतर्कज्ञानाविषयत्वकतयाग्राह्याभावाद्यनवगाहितयाचानुमितिंप्रतिसाक्षात्प्रतिबंधकत्वासंभवादितिध्येयं दूषकताबीजंपूर्वपक्षरहस्यंतर्कादिनेति सा
ध्याव्यापकत्वादिनिश्चयसामग्र्यादिनेत्यर्थः आदिपदात् तत्संशयपरिहारः सिद्धितेज्ञाने दूषकताबीजचिंतनंदूषकत्वस्यधर्मिणासत्वं यद्यपिचेति यद्वाचेत्यर्थः साध्यसाधनसहचारदर्शनेन सा
ध्यसाधनयोर्नियतसहचारदर्शनेन साध्यसाधनयोर्व्याप्यत्वनिश्चयेनेति यावत् साध्यव्यापकसाधनाव्यापकतयासाध्याव्यापकत्वनिश्चयादितिशेषः निश्चयस्यएवज्ञानमेवउपाधित्वनि
श्चयाभावात् उपाधित्वज्ञानाभावात् दूषकतैव दूषकताधर्मेवक्तव्यइतिचिंतितुतस्तत्कालीनदूषकतायामनुमितिकारणप्रतिबंधकज्ञानप्रयोजकरूपत्वसामान्यादनुमितिप्रतिबंधकज्ञा
नप्रयोजकतारूपत्वंचिंतनमित्यर्थः किंचेति यतइत्यर्थः सत्प्रतिपक्षतयेति स्वव्यतिरेकलिंगकसाध्याभावानुमितिप्रयोजकतयेत्यर्थः व्याप्यत्वासिद्धत्वेति व्याप्तिविरहारूपत्वेनविशेषणावि
याहेतुविशेष्यकव्याप्यभावप्रकारकज्ञानप्रयोजकतयेत्यर्थः स्वानंतरंगवेति तद्धितररूपेणावेत्यर्थः तच्चरूपंस्वाव्याप्यत्वलिंगकहेतुपक्षकसाध्यव्याप्तिविरहानुमितिप्रयोजकत्वंवक्ष्यमाणा
व्यभिचारज्ञानप्रयोजकत्वंचेतिभावः साध्यव्यापकतानिश्चयः तदुद्भवत्वस्यचाग्रेस्फुटत्वात् यद्व्यभिचारज्ञानद्वारेति मानसव्यभिचारग्रहस्यप्रयोजकतयेत्यर्थः अतोनाग्रिमेत्यादौनरुक्तंमानसव्य
भिचारनिश्चयेउपाधिज्ञानस्यविशेषदर्शनतयोपयोगित्वेन तद्विषयतयोपाधेरपितत्प्रयोजकत्वादितिभावः सात्साध्यव्यापकाव्याप्यत्वेनेति स्वाशीष्टसाध्यव्यापकतावच्छेदकरूपावच्छिन्ना
व्याप्यत्वेनहेतोसाध्यव्याप्तिविरहानुमितेःप्रयोजकतयावेत्यर्थः एतच्चोपाधित्वनिश्चयाभिप्रायेण उपाधित्वसंशयस्यतुसाध्यव्यभिचारवत् साध्यव्याप्तिविरहस्यापिसंशयंप्रतितद्वद्गतिज्ञानस्यप्रयोज

मू० म० कत्वं तत्र साध्यव्याप्तिविरहप्रदर्शनं साध्यवद्भाववृत्तित्वविशिष्टं साध्यवद्वृत्तित्वरूपव्याप्तिविरहपरं न तु स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तेः एतेन स्वसमानाधिकरणात्यन्ताभावप्रति
योगित्वं साध्यव्याप्तिविरहः इत्यपि निरस्तं स्वरूपस्याननुगतस्याभावेन पक्षीभूतसाधनव्यक्तीपर्यवसानेऽसाध्यप्रसिद्धेर्माननेरोधाधिकृतत्वार्थतया हेतन्वनुमानवैफल्यापत्तेरिति ध्येयं का
भेदेन व्यवस्थापितविषयकमाह यद्वेति साध्यव्यापकेति साध्यव्यापको यो धूमभाववद्वृत्तित्वेनेत्यर्थः उन्नेयं हेतावनुमेयं तथा च पक्षधर्मिकव्यभिचारानुमितिप्रयोजकत्वमुपाधेर्दूषकत्व
मिति भावः एतदपि निष्कृष्यदशायां श्रद्धेयम् इदं च वक्ष्यमाणं साध्यव्यापकत्वे सति पक्षावृत्तित्वरूपोपाधित्वज्ञानस्य दूषकताबीजमुक्तं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति
पक्षावृत्तित्वरूपोपाधित्वज्ञानस्य दूषकताबीजमुक्तं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वरूपोपाधित्वज्ञानस्य तु सत्प्रतिपक्षोत्थापकत्वं विरोधो व्यापकत्वं च दू
षकताबीजं बोध्यं सत्प्रतिपक्षोत्थापकत्वं च पक्षे साध्याभावव्याप्योपाध्यभाववत्ता निश्चयप्रयोजकत्वं बाधोत्थापकत्वं च पक्षे साध्याभावानुमितिप्रयोजकत्वं तच्च पक्षेऽनुपाधेव
त्ता साध्यव्याप्यहेतुमत्ता निश्चयापविरहदशायां पक्षे साध्याभावव्याप्योपाध्यभाववत्ता निश्चयदशायामेवं व्याप्तिविरहानुमाने व्यभिचारानुमाने चोपाधिमाशंकते नचेति पक्षीभूतसाध्य
भाववद्वृत्तित्वमित्यर्थः व्यभिचारास्फूर्तिदशायामेवोपाधिना व्याप्तिविरहाद्यनुमानाद्यत्राधिकरणे हेतोः साध्यव्यभिचारित्वं तद्धर्मेण साध्यव्यापकत्वग्रह इति भावः उपाधिमात्रस्य
तादृशोपाध्याभासप्रसञ्जनमात्रस्य च निरुपाधित्वोच्छेदप्रसंगादित्यर्थः केवलान्वयिनि पक्षीभूते पक्षीभूतसाधनाभावस्याप्रसिद्ध्या तद्वृत्तित्वस्योपाधित्वासंभवेऽपि तद्भिन्ने पक्षीभूते सर्वत्रै राम०
वतद्रूपासुलभत्वादिति भावः सत्प्रतिपक्ष इति यथा सत्प्रतिपक्षे एवं साधनव्यतिरेकस्योपाधित्वनियमे सत्प्रतिपक्षमात्रस्य निरुपाधित्वोच्छेदप्रसंग इत्यर्थः श्रुत्यन्तेति व्याप्तिविरहसाधनाभिप्रा

धा ने १

येरोदं साधनताव्याप्यत्वस्य तत्रोपाधिताभिमतं तु नेत्तदोष इति ध्येयं संयोगादावि ति एतच्चासाधनाभाववद्वृत्तित्वं यथाश्रुतमध्येयं साध्याभावोपनिरवच्छिन्नाधिकरणतावद्वृत्तित्वस्योपाधित्वाभि
धाने तु यं दोष इति ध्येयं ॥ उपाधिं दूषकतावीजं रहस्य उपाधिनिरूपणतदाभासान्तर्गतायितुं शिष्यावधानाय प्रतिजानीते अथेति उपाधिनिरूपणानंतरमित्यर्थः उपाध्याभास इति निरूप्यं
त इति शेषः असाधारणाविपर्यय इति असाधारणो विपर्ययो व्यतिरेको यस्येति हेत्वोर्हि साध्याभावे साध्ये इति चार्थो ऽरणीयं तथाच यद्भावः साध्ये ऽसाधारणो भवति स उपाध्याभास इ
त्यर्थः असाधारणपि हि सर्वसपक्षविपक्षव्यावृत्तत्वमात्रं साध्याभासरूपसाधववद्वृत्तित्वमित्याहुः तथाच यद्भावः साध्याभाववद्वृत्तिः स उपाध्याभास इति फलितं तस्य साध्यव्यापकत्वा
भावेनानुपाधित्वादिति भावः असोदाहरणमाह यथेति केवलान्वयिसाध्ये साध्याभावाप्रसिद्ध्या ऽन्वयव्यतिरेकिणीमात्रं अन्वयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकव्यतिरेकप्रतियोगी
त्यर्थः ज्ञेयत्वं दोषवद्धिमान्द्रव्यत्वादित्यादौ इतरत्वादेर्व्यतिरेकस्य साध्याभाववद्वृत्तित्वविरहादाधोन्नीतान्येति पक्षविशेषणं साध्याभाववत्त्वाप्रसिद्धतान्येत्यर्थः तथाच पर्वतो वह्निमान्
धूमादित्यादौ पर्वतेतरत्वादिकमिति भावः शंखलक्षणसाध्याभावे साध्ये इत्याशयेन पूरणीयं असाधारणोऽन्यं च सर्वसपक्षविपक्षव्यावृत्तत्वमुक्तं साध्यवत्त्वानिश्चितवृत्तित्वे सति साध्याभा
ववन्मात्रवृत्तित्वाच्चतः स उपाध्याभास इत्यर्थः अत एवोदाहरणे केवलव्यतिरेकिणि सपक्षस्य केवलान्वयिनि च विपक्षस्याप्रसिद्धावसपक्षेतरत्वादारणायान्वयव्यतिरेकिणीमत्रं व
क्षिः नुमतः कृतकत्वादित्यादौ पक्षस्यैव विपक्षतया ऽस्थिरत्वसाम्यप्रत्यक्षत्वात्तद्वारणाय वाधोन्नीतान्येत्युक्तं साध्याभाववत्त्वानिश्चितानेतित्यर्थः इदमुपलक्षणं भूर्नित्या गंधवत्वात् अरनित्या
भूमिन्नत्वादित्यादौ केवलव्यतिरेकिण्यपि विपक्षेतरत्वमुदाहरणं बोध्यं तच्च सपक्षस्याप्रसिद्धत्वादिति वदेति तत्र तत्र क्षितिरनुमतः कृतकत्वादित्यादौ वाधोन्नीतपक्षेतरत्वेति याप्तिवारणाय विपक्षस्या

मू० म० वत्तत्वदलस्य स्वरूपकत्वेपि सपक्षव्यावृत्ततद्दलस्यव्यर्थत्वात् पृथिवीइतरेभ्यो भिद्यते इत्यत्रादिसाद्दौ केवलव्यतिरेकिण्यपि पक्षेतरत्वस्योपाध्याभासतयात दूरणासायुक्तत्वात् किं
चैवंवन्हिरस्तु मास्तु तकत्वाद्हिसाद्दौ वाधितेयाहासौ रालोकादावेव साध्याभावनिश्चयो न तु पक्षेतद्दा पक्षेतरत्वस्योपाध्याभावसात्तापत्तिः एवंच मबाजूवन्हे हिसादौ आर्द्रेन्धनाघधिकरणे
व साध्यवत्तमावयो निश्चयो न तु तदनधिकरणे तदा तत्रार्द्रेन्धनादेरूपाध्याभासतापत्ति नचेष्टापत्तिः साध्यव्यापकत्वादेस्तदानीमपि सत्वेनाभासतायां वीजाभावात् न च पन्न तेऽपाधि
त्वज्ञानसमपक्षेसाध्याभावव्याप्याप्यापाध्यभाववत्ताज्ञानद्वारानुमितिप्रतिवंधकत्वं तन्मतेतदानीं तेषामभावे साध्याभावव्याप्यत्वज्ञानासंभव एवोपाध्याभासत्वे वीजमितिवाच्यं असार
धारणपज्ञानस्याज्ञानस्यानुमितिप्रसतिवंधकतया तत्सत्वेपि साध्याभावव्याप्यत्वज्ञाने वोधकाभावात् असाधारणपज्ञानस्यान्वयसहचारग्रहप्रतिवंधकतया व्याप्तिज्ञानप्रतिवंधकत्वपक्षे
पन्वयव्याप्तिज्ञानं प्रत्येव प्रतिवंधकतया तत्सत्वेपि साध्याभावस्य व्यतिरेकव्याप्तिज्ञाने वाधकाभावाच्चेति ध्येयं अप्रसिद्धसाध्यविपर्यये च दृश्यति साध्यस्य साध्यतावच्छेदकरूपेणाभावो
ऽलीकः अप्रसिद्धतामादाय प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्याभावः यदृश्यति यावत् पक्षेतरादिरिसादिपक्षस्य पक्षेतरातिरिक्तवत्त्वमात्रपरिग्रहः केवलान्वयिनि साध्ये व्याप्तिसाध्य
व्यापकत्वस्य च्छिन्नसाधनाव्यापकत्वज्ञानस्य च रहाद्युक्तमात्रस्यैवोपाध्याभासत्वादिति भावः वाधितेति अव्याप्यतासंवंधेन वाधितसाध्यविपर्ययोयत्रेति तुसत्तासाध्याभावव्याप्यत्वस्यार्थ
अत्रैतत्सत्वपि तिन विघते तत्कार्यं यत्रेति मुसत्ताज पक्षावर्तकस्त्रियाऽः तत्साप्यमेवार्थः क्षित्यादिकं मितिपृथिव्यादिकं मिमर्थः अरउव्यतिरिक्तेति परमाणु[redacted] राम०
भिन्नत्वं अस्योपाध्याभासत्वे वीजमाहअत्रेति परमाणुव्यतिरिक्तत्वात्तदर्थः अरावतिरिक्तत्वव्यतिरेकस्य परमाणुव्यतिरिक्तत्वव्यतिरेकस्य एवकशवदस्य एकदेशस्य स्मानिम पृथिव्यामेवेवत्त्वे ति

यावत्भागासिद्धेरीतिउपाधिलक्षणांतर्गतस्वसाधनाव्यापकत्वभागस्यासिद्धेरित्यर्थः किंतु सर्वमसाधारणोपाध्याभासानुगमकमपि तत्पक्षेतरत्वविशिष्टधर्मावच्छिन्नसाध्यव्या
पकत्वे सति पक्षावृत्तित्वमेवोपाधिरिति मतेऽपाध्याभासानुगमापत्ति बाधितेति यत्समानाधिकरणसाध्यसाधनसाधनतावच्छेदकरूपेणाभावपक्षेवाधितस्यर्थ [redacted]
अन्हतेन्तत्वं अकार्यत्वप्रसंगात्धर्मावच्छिन्नसाध्यस्य पक्षेपि सत्वेन तादृशसाध्यव्यापकत्वविरहादिति भावः इदमुपलक्षणं पर्वतो धूमवान् वह्नेरित्यादावार्द्रेन्धनादिकमपि वो
ध्यं पक्षव्यापकेति पक्षैकदेशावृत्तीत्यर्थः क्षित्यादिकं पार्थिवद्व्यणुकादिकं अणुत्वव्यतिरिक्तत्वस्योपाध्याभासत्वेवीजमाह अन्वेति अणुत्वव्यतिरिक्तत्वस्य पक्षाव्यापकत्वविपर्यय
कत्वमुपपादयति अन्वेति क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्रेत्यर्थः एकदेशवृत्तमा एकदेशे द्व्यणुके एववृत्त्या भागासिद्धेः पक्षैकदेशावृत्तेः यद्वा अणुत्वव्यतिरिक्तत्वस्योपाध्याभा
सत्वेवीजमाह अन्वेति अणुत्वव्यतिरिक्तत्वे इत्यर्थः भागासिद्धेरितिउपाधिलक्षणांतर्गतस्य पक्षावृत्तित्वभागस्यासिद्धेरित्यर्थः इष्टापत्तिः स्यात् इति पक्षे सर्वत्रैव पूर्वसाधनव्यतिरेक उ
दुपाधिरिति मतं उच्छत्तो निराकर्तुमाह पूर्वसाधनव्यतिरेक इति पूर्वसाधनव्यतिरेकोपीत्यर्थः क्वचिदुपाध्याभासव्यावर्तनेशेष एतेन पूर्वसाधनाव्यतिरेकत्वस्योपाध्याभासत्व नियतत्वे आर्द्रे
न्धनाभावेन धूमाभावस्यस्यापनासंभवात् हेतौ वह्न्यभावाद्यार्द्रेन्धनस्योपाधित्वं न स्यादिति पूर्वपक्षो निरस्त इत्यर्थः एतेनैवदुपजन्येति गुरणामतेसातिसत्वं दुपजन्मनिर्विवक्षकविषयत्वादित्यर्थः प
ण्यामूत्रेवशठाद्यभिव्यक्तिरसेव्यभिचारापत्तेः पूर्वसाधनव्यतिरेकस्याऽसदुपाधितयाऽव्हहरणात्वासंगतेः शर्करायां रसदनुपनीतभानविषयेशर्करायांव्यभिचारवारणाय निर्विवक्षकत्वेनो
पादानं निर्विकल्पकत्वं सप्रकारकभिन्नत्वं तेनांशिकनिर्विकल्पकत्वमादाय नत दोषनादवस्थ्यं पूर्वसाधनव्यतिरेकत्वस्यासदुपाधित्वनियमेबाधकमाह पूर्वसाधनतयेति पूर्वसाधनव्यति

५०

चिन्तामणौ अनुमानखण्डे हेत्वाभासनिरूपणम्।
मथुरानाथविरचितम्।

मू०मु०

44
2 (B)

रेकत्वसमदुपाधित्वनियमइत्यादि अव्यवस्थितत्वादिति क्वचिन्नित्यत्वसाधकोक्तहेतौ क्वचिदनित्यत्वसाधकोक्तहेतौ चसत्वादित्यर्थः क्वचिदिति शार्कररसोनित्यः गुणान्यत्वे सति रस
नेंद्रियजन्यनिर्विकल्पकविषयत्वादिति नित्यत्वसाधके हेतौ च पूर्वप्रयोगदशायामित्यर्थः नित्यत्वसाधकेति अनित्यत्वसाधके अनित्यवृत्तिगुणत्वे गुणान्यत्वे सतीत्यादिनित्यत्वसाधहे
तोरुपाधित्वं स्यादित्यर्थः क्वचिदिति शार्करो रसोऽनित्योऽनित्यवृत्तिगुणत्वादित्यनित्यत्वसाधकहेतोः पूर्वप्रयोगदशायामित्यर्थः अनित्यत्वसाधकेति नित्यत्वसाधके गुणान्यत्वे स
तीत्यादिहेतो अनित्यवृत्तिगुणत्वरूपानित्यत्वसाधकहेतोरभावस्येत्यर्थः उपाधित्वं स्यादिति शेषः वस्तुव्यवस्थितेति तदुभयहेतौ वस्तुगत्या साध्यव्याप्यत्वअवस्थ्यासाध्यव्याप्यत्वव
स्थापनेनेत्यादीत्यर्थः आभासनिरूपाधित्वनियतत्वादिति भावः ननु दृष्टान्तविशेषेनिरुपाधित्वेन व्याप्तिग्रहेऽस्तु तत्राह उपाधेरिति नित्यदोषत्वात् सदातनदोषत्वात् व्याप्यवृत्तित्वादिति
यावत् येनसोपाधिकसंबंधमिति यत्साधकसोपाधित्वसंबंधमित्यर्थः नेनानुपाधित्वसंबंधमिति तत्साधकानुपाधित्वसंबंधमित्यर्थः पूर्वसाधनव्यतिरेकस्यासदुपाधित्वनियमेके
नचिदुक्तं वीजमाशंक्यनिराकरोति नचेति अनुपाधित्वे सदुपाधित्वानियमे पूर्वसाधव्यतिरेकस्य सदुपाधित्वनियमेपि तस्योपाधित्वाप्रतिसंधानदशायां सत्प्रतिपक्षसंभवादिति भा
वः स्यव्यतिरेके पूर्वसाधनव्यतिरेकस्योपाध्याभासत्वं दर्शयति स्थापनायाः इति तद्भावसाधकप्रतिस्थापनायाः साध्यसाव्यापकत्वेनेत्यर्थः अनुपाधित्वात् उपाध्याभासत्वात् अत एवेति
व्यभिचारित्वादेवेत्यर्थः अप्रत्यक्षमारोपितिस्थापनायामव्यभिचारग्रहदशायामिति शेषः अकर्तृकत्वानुमानइति अकर्तृकत्वसाधकेसति हेतावजन्यत्वमित्यर्थः नित्यत्वादीति ध्वंसाप्रतियोगि राम०
त्वरूपस्य नित्यत्वस्य प्रागभावेसाध्यव्यापकत्वाभङ्गे तोसाध्यव्यभिचारविरहात् प्राप्यमुपाधिध्याभास इति भावः पक्षेति भावप्रधानो निर्देशः पक्षविपक्षान्यतरयत्नप्रतिमित्यर्थः क्वचिदुपाधाभा

44
2 (B)

“अनुमानखण्ड:”